सुभाषित व्याकरण - 3

Subhashit Grammar -3

Compiler : Kishore Nayak
Editor : Padmakar Gangatirkar

शनिवार, आषाढ कृ. त्रयोदशी १९४२, शर्वरी संवत्सर

Introduction:

This is the third collection of fifty Subhashitas with full anvay and word by word grammar. The Appendix has explanation of abbrevations and some grammar. Hope you enjoy the beauty, the depth and practical wisdom of these Subhashitas.

गणेशः स्तौति मार्जारं स्ववाहस्य अभिरक्षणे।
महानपि प्रसंगेन नीचं सेवितुमिच्छति ॥१०१॥

गणेशः, स्व-वाहस्य अभिरक्षणे, मार्जारम् स्तौति। महान् अपि प्रसंगेन नीचं सेवितुम् इच्छति।

Lord Ganesh worships a cat for the protection of his carriage (mouse). At times of need, mighty also like (have) to serve the low.

(This one is similar to popular Marathi proverb अडला हरी गाढवाचे पाय धरी- At times of need, God also holds feet of a donkey)

गणेशः- Lord Ganesh & महान्- great, both पु. लिं. प्र. वि. ए. व., स्ववाहस्य -ष. वि. ए. व. of स्ववाहः - स्व- (pronominal adjctv.) One's own- वाहः -conveyance, carriage, ride स्वस्य वाहः -ष. तत्पुरुष स, अभिरक्षणे -स. वि. ए. व. of अभिरक्षण- अभि- (अव्यय) as a prefix to verb and noun, it means towards, for, greatly, over-रक्षण- protection, मार्जारम्-नीचम्- both द्वि. वि. ए. व. of मार्जारः (or लः) -a cat & नीचः -low or humble person (नीचस्- अव्यय- low, below), स्तौति- तृ. पु. ए. व. of स्तु-स्तौति-स्तवीति स्तुते-स्तुवीते- २ ग. उ. प. to praise, to worship, प्रसंगेन- तृ. वि. ए. व. of प्रसंग- occasion, incident, अपि (अव्यय) -also, too, सेवितुम्- तुमन्त धा. सा. अव्यय of सेव्-सेवते-१ ग. आ. प. to serve, honour, attend upon, इच्छति- तृ. पु. ए. व. of इष्- ६ ग. प. प. to wish, desire, like

क्षते प्रहारा निपतंत्यभीक्ष्णं धनक्षये दीप्यति जाठराग्निः ।
आपत्सु वैराणि समुल्लसंति छिद्रेष्वनर्था बहुलीभवंति ॥१०२॥ -पञ्चतंत्र

अभीक्ष्णम् प्रहाराः क्षते निपतन्ति। धन-क्षये जाठराग्निः दीप्यति। आपत्सु वैराणि सम्-उद्-लसंति। छिद्रेषु अनर्थाः बहुली भवंति।

Repeated blows befall on already wounded. The digestive fire blazes more when one has no money. Enemies rejoice when one is in trouble. When someone's life is being torn apart, he commit s more blunders.

क्षते - धनक्षये - आपत्सु -छिद्रेषु all स. वि. ए. व. of क्षत-(adjctv) -wound, hurt, injury (क्षण्-क्षणोति-८ ग. प. प. to injure, hurt, धनम्- न. लिं money, wealth, क्षय-(adjctv) loss, wane (क्षि- १,५,९, ग. प. प.- क्षयति, क्षिणोति, क्षिणाति - to diminish, wane), धनस्य क्षयः - धनक्षयः - ष. तत्पुरुष स.- loss of wealth, आपद्- स्त्री. लिं.- calamity, misfortune छिद्रम्- न. लिं. hole, crack, weak point, प्रहाराः -hit, blow,अभीक्ष -adjctv- constant, repeated, frequent, निपतन्ति- तृ. पु. ब. व. of नि+ पत्-पतति १ ग. प. प. Befall, descend, जठरम्- stomach- अग्निः -fire- जठरस्य अग्निः - जाठराग्निः - ष. तत्पुरुष स. (जठर- stomach जाठर-related to

stomach), दीप्यति- gets inflamed- कर्मणि तृ. पु. ए. व. of दीप्- दीप्यते ४ ग आ. प. to blaze, burn, be lighted, वैराणि- अनर्थाः -प्र. वि. ब. व. of वैरम्- न. लिं enmity, hostility - अनर्थः - पु.लिं. calamity, misfortune, सम्-उद्-लसंति- gets exhilaration, great joy- लस्- लसति १ ग. प.प. to shine , glitter, बहुल- abundant, ample, भवंति- तृ. पु. ब. व. of भू भवति १ ग. प. प. to be, happen

मर्कटस्य सुरापानं , मध्ये वृश्चिक दम्शनम् ।
तन्मध्ये भूतसञ्चारो, यद्वा तद्वा भविष्यति ॥१०३॥

(यदा) मर्कटस्य सुरा-पानं (भवति), (तद्) मध्ये वृश्चिक-दम्शनम् (भवति) ।
तद्-मध्ये भूत-सञ्चारः (भवति), (तदा), यद्वा तद्वा भविष्यति॥

When amidst a monkey's drinking, it gets stung by a scorpion, and then it gets invaded by ghosts, then anything can happen!

मर्कटस्य - ष. वि. ए. व. of मर्कटः (पु. लिं)- monkey, सुरापानम् - drink of a wine- सुरा- स्त्री. लिं- wine, liquor, पानम्- drinking, a drink (धा.सा. नाम of पा-पिबति १, ग. प. प. to drink) वृश्चिकदम्शनम्- stinging by a scorpion, वृश्चिकः - scorpion, दम्शनम्- act of biting or stinging (धा.सा.नाम of दंश्- दशति १ ग. प.प.) - भूतसञ्चारः - invasion of ghosts- भूतम्- a spirit, ghost, devil (also means any being, creature). सञ्चारः - inciting, going, movement (धा. सा. नाम of सं+ चर्- चरति -१ ग. प.प. to roam, move)- - सुरायाः पानम्, वृश्चिकस्य दम्शनम्, भूतानाम् सञ्चारः - all three ष. तत्पुरुष स., मध्ये- स. वि. ए. व. of मध्य - (adjctv) middle, यद्वा (यद् वा) whether, or else and तद्वा (तद् वा) like that, in that manner- both अव्यय. भविष्यति- सामान्य (द्वितीय) भविष्य, तृ. पु. ए. व. of भू-भवति- १ ग. प. प. to happen, to be.

तृणाल्लघुतरः तूलः, तूलादपि च याचकः।
वायुना किं न नीतोऽसौ ? 'मामयं प्रार्थयेदिति' ॥१०४॥

तूलः तृणात् लघुतरःअस्ति, याचकः (तु) तूलात् अपि च (लघुतरः) (भवति)! असौ वायुना किं न नीतः ?
'अयं माम् प्रार्थयेत् इति' (वायुना चिन्तितम्) ॥

Cotton is lighter than grass, a beggar is even more lighter than cotton. Why then he (the beggar) is not carried away by the wind ? (Because the wind is fearing) "he may beg from me" !

तूलः,लघुतरः, याचकः नीतः- all प्र. वि. ए. व. of तूल- cotton, लघुतर- lighter - लघु-adjctv- light, small, weak, feeble, याचक- beggar, नीत- taken (नीत- कर्म.. भू. धा. वि. Of नी -नयति-ते १ ग. उ. प. to carry, take away) , तृणात् & तूलात् - पं. वि. ए. व. of तृणम् -grass & तूलः or तूलम्- cotton, अपि- अव्यय -also, असौ- पु. लिं. प्र. वि. ए. व. of अदस् -he,she, it, that, वायुना-पु. लिं. तृ. वि. ए. व. of वायु- wind, किम् pronominal adjctv- why, who, अयम्- पु. लिं. प्र. वि. ए. व. of इदम्- this, he, she, it, माम् - पु. लिं. द्वि. वि. ए. व. of अस्मद् - I, we, प्रार्थयेत् - विध्यर्थ तृ. पु. ए. व. of प्र+अर्थ् -अर्थयति-ते १० ग. उ. प. to pray, beg, ask, इति- अव्यय- like, this, as follows

दृष्ट्वा यतिर्यतिं सद्यो वैद्यो वैद्यं नटं नटः।
याचको याचकं दृष्ट्वा श्वानवद् गुर्गुरायते ॥१०५॥ -

यतिः यतिम् दृष्ट्वा, वैद्यः वैद्यम् (दृष्ट्वा), नटः नटम् (दृष्ट्वा), याचकः याचकम् दृष्ट्वा, सद्यः श्वानवद् गुर्गुरायते।
Similar - समान शब्दा: - पंडितः पंडितम् दृष्ट्वा
An ascetic (after) seeing another ascetic or a doctor (after) seeing another doctor or a beggar (after) seeing another beggar (or a scholar seeing another scholar), is instantly made to growl like a dog!.

यतिः, वैद्यः, नटः, याचकः, पंडितः all- प्र. वि. ए. व. & यतिम्, वैद्यम्, नटम् , याचकम् ,पंडितम् all पु. लिं. द्वि.वि. ए. व. of यति - ascetic, वैद्य - physician (also means learned man, doctor), नट - actor, याचक- beggar, पंडित- scholar, दृष्ट्वा- पू. काल. वा. त्वान्त धा.सा. अव्यय of दृश्-पश्यति १ ग. प. प. to see, look at, call upon, सद्यः (सद्यस्) -अव्यय- immediately, instantly (also means today, the same day), श्वानः - a dog, वद्-वत् -अव्यय- an affix to nouns shows likeness, possession, resemblance,
गुर् - गुरते ६ ग.आ.प.- to make an effort or exertion गुरायते - प्रयोजक - causes to make an exertion

दुर्जनः प्रकृतिं याति, सेव्यमानोपि यत्नतः।
स्वेदनाभ्यञ्जनोपायैः, श्वपुच्छमिव नामितम् ॥१०६॥

दुर्जनः, यत्नतः सेव्यमानः अपि (स्व) प्रकृतिं (हि) याति।
श्व-पुच्छम् स्वेदन(च),अभ्यञ्जन (च),उपायैः (अपि) नामितम् इव ॥

However best he is served with honor and efforts, a wicked person gets back to his original form, like a dog's tail, which remains bent even after lot of oil massage and sweating !

दुर्जनः - wicked or bad person, यत्न: - an effort , exertion यत्नतः -with efforts, endeavours, care सेव्य (adj)- to be served मान: - respect, honor सेव्-सेवते १ ग. आ. प. to serve, attend upon- दुर्जनः, यत्नतः ,सेव्यमानः - all three प्र. वि. ए. व., अपि (अव्यय)- also, प्रकृतिम्-द्वि. वि. ए. व. of प्रकृति - natural condition, form, याति- तृ. पु. ए. व. of या- २ ग. प. प. to come, become, श्वपुच्छम् - a dog's tail- श्वन्- पु. लिं a dog - श्वनः पुच्छम् - ष. तत्पुरुष स., स्वेदन - धा. सा. नाम of स्विद्- स्विद्यति ४ ग. प. प. to sweat, perspire, अभ्यञ्जनम् - oil massage, उपायैः- तृ. वि. ब. व. of उपायः- effort, stratagem, इव (अव्यय) like, similar to, नामितम्- to be bent, curved- कर्म.भू. धा. वि. of causal form of नम्- नमति-ते १ ग.उ. प. to bow, bend.

न द्विषन्ति न याचन्ते परनिन्दां न कुर्वते।
अनाहूता न चायान्ति तेनाश्मानोऽपि देवताः॥१०७॥

अश्मानः न द्विषन्ति। (ते) न याचन्ते। (ते) परनिन्दां न कुर्वते।
(ते) अनाहूताः न च आयान्ति। तेन (ते) अपि देवताः (भवन्ति) ॥

Stones do not hate. (They) do not beg. (They) do not defame anyone. (They) also do not go anywhere uninvited. That is the reason (they) are also deities.

अश्मानः, देवताः & अनाहूताः –all प्र. वि. ब. व.-of अश्मन्- पु. लिं- stone,, देवता- स्त्री. लि-deity & अनाहूत - न आहूत- नञ्तत्पुरुष स. –uninvited- आहूत- कर्म. भू. धा. वि. of आ+ह्वे to invite- ह्वे- ह्वयति-ते -१ ग. उ. प. to call, द्विषन्ति- याचन्ते- कुर्वते-आयान्ति : all वर्त. तृ. पु. ब. व. of द्विष्- द्वेष्टि- द्विष्टे २ ग. उ. प. to hate, dislike, but here द्विषति -१ ग. प.प., याच्- याचते- १. ग. आ. प. to beg, कृ- करोति-कुरुते ८ ग. उ. प. to do, या- याति २ ग. प. प. to go, become, आ+ या- to come, परनिन्दाम्- द्वि. वि. ए. व. of परनिन्दा- पर (adjctv) other, stranger, निन्दा- defamation, blame, criticism, censure, परस्य or पराणाम् निन्दा- ष. तत्पुरुष स, तेन - from that, by that तृ. वि. ए. व. of तद्- that, अपि (अव्यय) also, too.

कन्या वरयते रूपं, माता वित्तं पिता श्रुतम् ।
बांधवाः कुलमिच्छंति, मिष्टान्नमितरे जनाः ॥१०८॥

कन्या रूपम् वरयते, माता वित्तम् (इच्छति)। पिता श्रुतम् (इच्छति)।
बांधवाः कुलम् इच्छंति। (किन्तु) इतरे जनाः (केवलम्)मिष्टान्नम् (इच्छंति) ॥

The (potential) bride courts for a handsome (groom). Mother wants the groom to be wealthy. Father wants him to be well educated. Relatives want (him to come from) a good family. (But) others look (only) for a sumptuous, sweet feast!

कन्या - माता & पिता all प्र. वि. ए. व. of कन्या- girl, here a potential bride - स्त्री लिं, मातृ - mother स्त्री लिं & पितृ- father -पु. लिं. बांधवाः, जनाः - both प्र. वि. ब. व. of बांधव- relative, जन- people, रूपम् - beauty, वित्तम्- wealth, श्रुतम् -education, कुलम् - family, मिष्टम् अन्नम्- -मिष्टान्नम् - excellent food वि.पु.कर्म.स.. मिष्ट- (adjctv) sweet, dainty अन्नम्-food –all in द्वि. वि. ए. व., वरयते - तृ. पु. ए. व. of वृ - १० ग. उ. प.- वरयति-ते- to select, choose, court, (also in १, ५, & ९, ग. उ. प. वरति-ते, वृणोति-वृणुते & वृणाति-वृणीते), इच्छति & इच्छंति- तृ. पु. ए. व. & ब. व. of इष्- ६ ग. प. प.- wish, desire इतरे- पु. लि. प्र. वि. ब. व. of pronominal adjctv इतर- the other, remaining (इतर- पु.लिं, इतरा-स्त्री. लिं & इतरत्- न. लिं).

हस्तादपि न दातव्यं गृहादपि न दीयते।
परोपकारणार्थाय वचने किं दरिद्रता॥१०९॥

परोपकारण-अर्थाय हस्तात् (किम्) अपि दातव्यम् न (अस्ति), गृहात् (किम्) अपि न दीयते।
(तदा) वचने दरिद्रता किम्?

In providing help to the others, if nothing is required to be given from the hand and nothing gets spent from the house, then why show stinginess in speaking !
(When there is no obligation involved, people speak liberally for giving to charity)

परोपकारणार्थाय- च. वि. ए. व. of परोपकारणार्थ- परः- another person, उपकारः - service, favour, help, पराय उपकारः - परोपकारः -च.. तत्पुरुष स. good to others ; परोपकाराय कारण: - परोपकारणः - च.. तत्पुरुष स. Doing good to others, अर्थः- purpose, object, desire- परोपकारणस्य अर्थः -परोपकारणार्थः - ष. तत्पुरुष स. - for purpose of helping other, हस्तात् - from hand & गृहात् - from house, both पं. वि. ए. व. of हस्तः -पु. लिं- hand & गृहम् -न. लिं -house, अपि -अव्यय- also, besides, too, दातव्यम् - to be given- कर्मणि

विध्यर्थ धा. सा. वि. of दा (other two forms दानीय & देय) and दीयते- gets spent - कर्मणि प्रयोग वर्त. तृ. पु. ए. व. of दा- यच्छति- १ ग. प. प. & ददाति- दत्ते ३ ग. उ. प. - to give, grant (note- दा-दाति- २ ग. प. प. to cut), वचने-स.वि. ए. व. of वचनम् -speaking, talking, दरिद्रता- meanness, stinginess; किम् pronominal adjctv- what, why

अञ्जलिस्थानि पुष्पाणि वासयन्ति करद्वयम्।
अहो सुमनसां प्रीतिर्वामदक्षिणयोः समा॥ ११०॥

अञ्जलिस्थानि पुष्पाणि करद्वयम् वासयन्ति।अहो, सुमनसां प्रीतिः वामदक्षिणयो: समा (भवति) ॥

Here first line is an example and second line is a statement with double meaning words.
Flowers in the palm make both hands fragrant.

First Meaning: Oh, flowers love both left and right (hand) equally
Second meaning: Oh persons with broad mind love bad and good people equally (Both do not discriminate between left and right or bad and good)

पुष्पाणि- flowers, अञ्जलिस्थानि- contained in palm- both न. लिं .प्र. वि. ब. व. of पुष्पम् and अञ्जलिस्थम् - अञ्जलिः- पु लि. प्र. वि. ए. व cavity formed by joining palms- अञ्जलि तिष्ठति इति - अञ्जलिस्थम्- held in palms- उपपद तत्पुरुष स., करः hand- द्वौ-two- द्वौ करयोः समाहारः- करद्वयम् - द्वंद्व स.-both hands, वासयन्ति- तृ. वि. ब. व.of वास्- वासयति-ते १० ग. उ. प. to scent, make fragrant, अहो-अव्यय- a particle showing surprise, wonder-Oh, सुमनसाम्- ष. वि. ब. व. of सुमनस् -adjct- पु. लिं - good minded, benevolent, learned man- - सुमनस्-स्त्री. लिं & न. लि. a flower, प्रीतिः - स्त्री. प्र. वि. ए. व. love, affection, favour, regard, वाम -adjctv- left, opposite, unfavourable, vile, wicked, दक्षिण -adjctv- right, competent, sincere, वामम् च दक्षिणम् च -वामदक्षिणौ- द्वंद्व स. वामदक्षिणयो: स. वि. द्वि. व - of left and right or bad and good, समा- adjctv- equal

अयं निजः परो वेति गणना लघुचेतसाम् |
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥१११॥

अयम् निजः, (अयं) परः वेतिलघु-चेतसाम् गणना (भवति)|
उदार-चरितानाम् तु वसुधा कुटुम्बकम् एव (अस्ति) ॥

The mean-minded people's thinking approaches people like, this one is mine, that one is an outsider. Whereas for broad-minded people (noble persons) think that the whole world as their family.

अयम्- This one निजः- one's own, related- परः -stranger, alien, outsider- all पु. लिं. प्र. वि. ए. व.of इदम्, निज & पर respectively, वेति- तृ.पु.ए.व. वी-वेति २ ग.प.प. To go, move, approach लघुचेतसाम्- पु. लिं. ष. वि. ब. व. of लघुचेतस् - लघु- adjctv- small, short, low, चेतस् - पु. - the mind, consciousness- लघुचेतसा: - येषां चेतसा: लघव: सन्ति ते -बहुव्रीहि स.. - mean minded, गणना- thinking, counting,, calculation, उदारचरितानाम्- पु. लिं. ष. वि. ब. व. of उदारचरितः - उदार- adjctv-generous, liberal, noble, चरित- known, life, behaviour (चरित- क. भू. धा. वि. of चर्-चरति- १ ग. प. प. to walk, behave towards,

conduct oneself)- उदारचरित: -यस्य चरित: उदार: अस्ति स: -बहुव्रीहि स. - broad-minded, noble person, तु- अव्यय- an adversative particle meaning 'but', 'on the contrary, 'on the other hand', वसुधा- world, earth, कुटुम्बकम् - household, family, एव -अव्यय-this particle is most frequently used to strengthen the idea expressed meaning just, exactly, alone, same, like

उत्तमः क्लेशविक्षोभं क्षमः सोढुम् न चेतरः।
मणिः एव महाशाणघर्षणं न तु मृत्कणः ॥११२॥

उत्तमः क्लेश-विक्षोभम् सोढुम् क्षमः (भवति), न च इतरः (तद् सोढुम् क्षमः अस्ति)।
मणिः एव महाशाणघर्षणम् (सहते) , न तु मृत्कणः (तद् सोढुम् क्षमः अस्ति) ॥

Great people alone can bear the struggling during distress, not the others. A precious stone alone can stand the grinding of cutting device not a clod or lump of earth.

उत्तमः (adjctv) - best, excellent, क्षमः (adjctv) - patient, enduring, इतरः - pronominal adjctv-the other, another, मणिः - precious stone, मृत्कणः- a clod or lump of earth - all पु. लि. प्र. वि. ए. व.(मृद्-earth, clay- स्त्री.लिं- मृद: कणः मृत्कणः - ष. तत्पुरुष स.), क्लेशविक्षोभम् - द्वि. वि. ए. व. of क्लेशविक्षोभ -pains of struggle- क्लेश -suffering, anguish, विक्षोभ- struggle, disturbance- क्लेशाणाम् विक्षोभः -ष. तत्पुरुष स., सोढुम् - तुमन्त हेत्वर्थक धा. सा. अव्यय of सह्-सहते १ ग. प. प. to bear, endure, suffer, एव -अव्यय-this particle is most frequently used to strengthen the idea expressed meaning just, exactly, alone, same, like तु- अव्यय- n adversative particle meaning 'but', 'on the contrary, 'on the other hand . महा- - Substitute for a महत् (adj) at the beginning of Karmadharay Samaas. -great, huge, शाणम्- touchstone, grinding stone, घर्षण- rubbing, friction- महत् शाणम्- महाशाणम्- कर्मधारय स.- महाशाणस्य घर्षणम्- महाशाणघर्षणम्- grinding of polishing stone--ष. तत्पुरुष स.,

उदयति यदि भानुः पश्चिमे दिग्विभागे | प्रचलति यदि मेरुः शीततां याति वह्निः |
विकसति यदि पद्मं पर्वताग्रे शिलायां | न चलति खलु वाक्यं सज्जनानां कदाचित्॥११३॥
-भर्तृहरि नीतिशतक

यदि भानुः पश्चिमे दिग्विभागे उदयति, यदि मेरुः प्रचलति, (यदि) वह्निः शीतताम् याति ।
यदि पद्मम् पर्वताग्रे शिलायाम् विकसति, (तथापि) सज्जनानाम् वाक्यम् खलु कदाचित् न चलति ॥

Even if, the Sun rises in the West, even if the mount Meru trembles, (even if) the fire gets cold, even if a lotus blooms on the mountain top rock, the word of virtuous (noble) people does not ever change at all.

यदि- अव्यय- if, in case, whether, भानुः -the Sun, मेरुः -the Mount Meru, वह्निः - the fire, पद्मम्- lotus - all प्र. वि. ए. व., पश्चिमे- in the west, दिग्विभागे, पर्वताग्रे - स. वि. ए. व. of दिग्विभागम् -न. लि. direction (दिशः विभागम्- ष. तत्पुरुष स.-दिश्-स्त्री.लिं-direction, विभागम्-part, portion) and पर्वताग्रं - mountain top (पर्वतस्य अग्रम्- ष. तत्पुरुष स.), उदयति, चलति, प्रचलति, याति, विकसति, all वर्त. तृ. पु. ए. व.of इ- एति -२ ग. प. प. to go, come to, उद्+इ- to rise, spring, चल्- १ ग. प.प. to walk, go, shake, deviate, move,

प्र+चल्- to tremble, या- २ ग. प. प. to get, go, become, कस्-कसति १ ग. प. प. to move, approach वि+कस् - to open, bloom, शीतताम्- द्वि. वि. ए. व. of शीतता-coolness, शिलायाम्- स. वि. ए. व. of शिला- rock स्त्री. लिं, सज्जनानाम्- ष. वि. ब. व. of सज्जन (सत्-good, noble + जनः people) वाक्यम्- sentence, word, खलु - अव्यय-indeed, really, कदा -अव्यय-when, what time, followed by चित् - means 'at one time' or 'at some time'.

अमितगुणोपि पदार्थो, दोषेणेकेन निन्दितो भवति।
निखिलरसायनमहितो, गन्धेनुग्रेण लशुन इव ॥११४॥

पदार्थः, अमित-गुणः अपि, एकेन दोषेण निन्दितः भवति ।
लशुनः , निखिल-रसायन-महितः, उग्रेण गन्धेन निन्दितः इव ॥

A thing (an object) having countless good qualities, gets blamed due to single fault, like a garlic, inspite of its well-known good medicinal properties, is detested for its strong smell.

लशुनः (लशूनः, लशुनम्)- garlic, निखिल- adjctv- complete, whole, all, रसः- object of taste, essence, अयन-source, abode- रसानाम् अयनम्- रसायनम्- elixir of life, good medicine --ष. तत्पुरुष स, महित- esteemed revered (क. भू. धा. वि. of मह् - १ ग. प. प. & १० उ. प. महति-महयति-ते- to honour, respect, revere, value, (निखिलः रसायनः - निखिलरसायनः- वि.पु.कर्मधारय -Complete good medicine महितः निखिलरसायनः - निखिलरसायनमहितः - विशेष्य पूर्वपद कर्मधारय. उग्रेण & गन्धेन both तृ. वि. ए. व. of उग्र - adjctv- strong, terrific, powerful & गन्धः -smell, odor, निन्दित- blamed, shamed (क. भू. धा. वि. of निन्द् - निन्दति १ ग.प.प. to blame, censure), इव - अव्यय- like, as, पद- object, abode (also means foot, a line of a stanza, verse)- पद+अर्थः - a thing, object or meaning of a word, अमित-countless, plenty-(न मितः अमितः नञ्तत्पुरुष स.)- मित- limited, measured (क. भू. धा. वि. of मा- माति २ ग. प. प & ३ ग. & ४ ग. आ.प.-मिमीते - मीयते - to limit, measure, गुणः - quality, virtue, अपि- अव्यय- even, also, एकेन & दोषेण- both तृ. वि. ए. व. of एक- one & दोष -fault, defect, blemish,भवति-तृ. पु. ए.व.of भू-१ ग. प. प.to happen, to be

उपकारिषु यः साधुः साधुत्वे तस्य को गुणः।
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ॥११५॥

यः उपकारिषु साधुः,साधुत्वे तस्य कः गुणः (भवति)।
यः अपकारिषु साधुः (भवति) सः साधुः (इति) सद्भिः उच्यते ॥

A person who is good (gentle) towards a helpful person, what is there in his goodness ? But if a person is good to a harmful person, he is called a sage by virtuous people

उपकारिषु - अपकारिषु- both स. वि. ब. व. of उपकारिन्- one who has helped (obliged) or of helpful nature, अपकारिन्- one who is harmful (ungrateful) & साधुत्वे स. वि. ए. व. of साधुत्व- nobility, virtue, यः , कः, सः, साधुः, गुणः, all पु. लिं. प्र. वि. ए. व. of यद्- who, which, what, किम् -who, which, what, तद् - he, she, it, that, all pronominal adjctvs, साधु- a noble person, sage, गुण - virtue, quality, तस्य-पु. लिं. ष. वि.

ए. व. of तद्, सद्भिः - तृ. वि. ब. व. of- सत्-पु. लिं noble, good, person, उच्यते- कर्मणि प्रयोग वर्त. तृ. पु. ए. व. of वच्- २ ग. प. प. वक्ति (उवाच) to say, relate, describe

गुणदोषौ बुधो गृह्णन् , इन्दुक्ष्वेडाविवेश्वरः ।
शिरसा श्लाघते पूर्वं , परं कण्ठे नियच्छति ॥११६॥

बुधः गुणदोषौ गृह्णाति, ईश्वरः (गृह्णाति) इन्दु-क्ष्वेडौ इव ।
(ईश्वरः) पूर्वम् (च) शिरसा श्लाघते, परम् (च) कण्ठे नियच्छति ॥

Wise person accepts virtues (good) and faults (bad) (equally), like Lord Shiva does with Moon and Venom ! (Lord Shiva) honors the former (Moon) on his head and restrains the latter (Venom) in his throat.

बुधः, ईश्वरः both पु. लिं. प्र. वि. ए. व. of बुध- learned, wise, ईश्वर- Lord Shiva, गुणदोषौ- द्वंद्व स. गुणः च दोषः च- virtues and faults , गृह्णन् - वर्त. धा. सा. वि. of ग्रह्- ९ ग. उ. प. गृह्णाति-गृह्णीते to take, accept, catch, इन्दुक्ष्वेडौ- द्वंद्व स. इन्दुः च क्ष्वेडः च - moon and venom or poison (both products of सागरमंथन), इव- अव्यय- like, as, पूर्वम्-first one, former, परम्- later, the other, शिरसा- न. लिं. तृ. वि. ए. व. of शिरस्- head, top, श्लाघते - तृ. पु. ए. व. of श्लाघ् -१ ग. आ.प. to praise, extol, कण्ठे - स. वि. ए. व. of कण्ठ throat, neck, नियच्छति- restrain, curb, check- यम्-यच्छति- १ ग. प. प to curb, control, यम्+नि curb well (please note दा-यच्छति १ ग. प. प. means to give, grant)

जाड्यं धियो हरति, सिञ्चति वाचि सत्यम्, मानोन्नतिं दिशति, पापमपाकरोति।
चेतः प्रसादयति, दिक्षु तनोति कीर्तिम्, सत्संगतिः कथय किं न करोति पुंसाम् ॥११७॥

(सत्संगतिः) धियः जाड्यम् हरति, वाचि सत्यम् सिञ्चति, मानोन्नतिम् दिशति, पापम् अपाकरोति, चेतः प्रसादयति, कीर्तिम् दिक्षु तनोति। कथय! सत्संगतिः पुंसाम् किम् न करोति ?

Company of noble people, takes away the laziness of mind , instills truth in speech, guides for boosting (self) respect, removes sins, pleases mind and spreads fame in all direction. (Now) tell me, what can it not do for men?

सत्संगतिः company of the noble- सत्- noble, good, संगति- company (सताम् संगतिः ष. तत्पुरुष स.), जाड्यम्- न. लि. laziness, apathy, सत्यम्- न. लि. truth, पापम् - न. लि. sin, मानोन्नतिम्- elevation of respect (मानस्य उन्नतिः- ष. तत्पुरुष स.), चेतः (चेतस्) - न. लि. mind, कीर्तिम्-स्त्री. लिं. fame- all in द्वि. वि. ए. व., धियः -स्त्री. लिं. ष. वि. ए. व. of धी- mind, intellect, वाचि -स. वि. ए. व. of वाच्- स्त्री. लिं talk, words, हरति- हृ-१ ग. प. प. to take away, remove, सिञ्चति- सिच् -६ ग. उ. प. सिञ्चति-ते- to infuse, instil, sprinkle, दिशति-दिश् ६ ग. उ. प. दिशति-ते to show, direct, give, अपाकरोति- drive away, remove- कृ. ८ ग. उ. प. करोति-कुरुते- to do- अपा+कृ- remove, प्रसादयति-pleases- सद्-१ ग. प. प. सीदति- to sit, recline, प्र+सद्- to be pleased (causal- प्रायोजक of सद्- सादयति-ते), दिक्षु- स. वि. ब. व. of दिश्-स्त्री. लिं. -direction, तनोति- तन् ८ ग. उ. प. तनोति-तनुते to stretch, extend,cover all in वर्त. तृ. पु. ए. व., कथय- आज्ञार्थ द्वि. पु. ए.

व. of कथ्- कथयति-ते १० ग. उ. प. to tell, say, पुंसाम्- ष. वि. ब. व. of पुंस्- man, human- पु. लिं (पुमान् पुमांसौ पुमांसः), किम्-(pronominal adjctv) what, which,

तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना नैको ऋषिर्यस्य (मनिर्यस्य) मतं प्रमाणम्।
धर्मस्य तत्त्वं निहितं गुहायाम् महाजनो येन गतः सः पन्थाः ॥११८॥

समान शब्दा: महाजना: येन गता:, ऋषिर्यस्य ->मनिर्यस्य . महाभारत वन. अ.३१३.११७

तर्कः अप्रतिष्ठः (अस्ति)। श्रुतयः विभिन्नाः (भवन्ति)। न एकः ऋषिः (मुनिः) (भवति),यस्य मतम् प्रमाणम् (अस्ति)। धर्मस्य तत्त्वम् गुहायाम् निहितम् (अस्ति)। (अत:) महाजनः येन गतः, सः पन्थाः (भवति) ॥

No conjecture (logic) is conclusive. The sacred texts are different (many). There is no single sage (prophet), whose opinion is a testimony. The essence (the primary substance) of the religion (prescribed course of conduct) is hidden in the cave. (Hence) one should follow the path which great people have travelled. (This was the answer Yudhistir gave to Yaksha)

तर्कः conjecture, logic, reasoning,अप्रतिष्ठः - unproven- प्रतिष्ठ- basis, proven, authority (न प्रतिष्ठः - अप्रतिष्ठः - नञ्तत्पुरुष स.), एकः one (person), ऋषिः (मुनिः) sage, saint, महाजनः -great person (महान् जनः - वि.पु.प.कर्म.स.) गतः - gone (क. भू. धा. वि. of गम्-गच्छति १ ग. प.प. to go), सः (pronoun तद्) he - all in प्र. वि. ए. व. श्रुतयः- sacred texts,Veda- श्रुतिः-स्त्री.लिं, विभिन्नाः different, many (विभिन्न - क. भू. धा. वि. of भिद् (भिद् -७ ग. उ. प. भिनत्ति-भिंत्ते- break, split वि+भिद् -disperse, scatter, suicide)- both प्र. वि. ब. व., यस्य- whose & धर्मस्य- of religion both ष. वि. ए. व. of यद्- which, what & धर्म, मतम्- opinion, view, प्रमाणम् -testimony, proof, तत्त्वम् - principles, essence गुहायाम् - in cave (स. वि. ए. व. of गुहा), निहितम् -hidden क. भू. धा. वि. of नि+हि- to hide, lodge, hold (हि-हिनोति-
५ प.प. to send, throw, cast), पन्थाः - पु. लिं. प्र. वि. ए. व. of पथिन्- a road, way, line of conduct (पंथाः पंथानौ पंथानः)

प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम् त्वसन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः।
विपद्युच्चैर्धैर्यं पदमनुविधेयं च महतां सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥११९॥ भतृहरि.नीतिशतक-५६

प्रिया न्याय्या च वृत्तिः, असु-भङ्गे अपि मलिनम् असुकरम्, अ-सन्तः तु न अभ्यर्थ्याः, सुहृत् अपि कृश-धनः न याच्यः, विपदि धैर्यम् उच्चैः, महताम् पदम् अनुविधेयम्, इदं विषमम् असि-धारा-व्रतम् सताम् केन उद्दिष्टम्?

Conduct which is pleasing and just, not indulging in dirty, unholy ways even at the cost of one’s life, not seeking help from the unholy, not to ask a friend who himself is short of money, great strength in times of calamities, following the foot-steps of the Great, who ordained for the virtuous persons this type of sword-edge vowed observance?

प्रिया- pleasing (प्रिय-adjctv), न्याय्या- just, lawful (न्याय्य - adjctv), वृत्तिः- conduct- all स्त्री.लिं प्र. वि. ए. व., असुः -breath, life, भङ्गः- breakdown - असोः भङ्गः असुभङ्गः - ष. तत्पुरुष स.- loss of life, अपि- अव्यय- even, also, मलिनम्- dirty, filthy- मलिन- adjctv, सुकरम्- virtuous, good, न सुकरम्-असुकरम्- नञ्तत्पुरुष

स.-bad, सन्तः- पु. लिं. प्र. वि. ब. व. of सत्- sage, noble- सताम्- ष. वि. ब. व of सत्, न सन्तः - असन्तः- नञ्तत्पुरुष स.-Unholy, bad, तु -अव्यय- but, rather, अभ्यर्थ्याः- पु. लिं. प्र. वि. ब. व. of अभ्यर्थिन्- one who begs- अभ्यर्थ्य-to be begged from (कर्मणि विध्यर्थ धा. वि. of अभि+अर्थ् to beg), सुहृत् - a friend, कृश- lean, week, धनम्- wealth- यस्य धनं कृशं अस्ति सः- बहुव्रीहि स., याच्यः - पु. लिं. प्र. वि. ए. व. of याच्य- कर्मणि विध्यर्थ धा. वि. of याच्- याचते -१ ग.आ. प. to beg, विपदि - स्त्री. लि. स. वि. ए. व. of विपद् calamity, धैर्यम् - strength, उच्चैः - तृ. वि. ए. व of उच्च adjctv- high, elevated, महताम् - ष. वि. ब. व. of महत् -great, noble, पदम् -footstep, अनुविधेयम्- to be followed- both पु. लिं. प्र. वि. ए. व. of पद and अनुविधेय- कर्मणि विध्यर्थ धा. वि. of अनु+ वि+धा- ३ ग. उ. प. दधाति-धत्ते), इदम्- न. लिं. प्र. वि. ए. व. pronoun "this or it", विषमम्- adjctv- difficult, painful, असिः - sword, धारा- sharp edge, व्रतम्- vow, resolve, केन- पु. लिं. तृ. वि. ए. व of किम् who, उद्दिष्टम्- ordained, advocated- कर्मणि विध्यर्थ धा. सा. वि. of उद्+दिश्- ६ ग. उ. प. दिशति-ते to point out, assign.

धवलयति समग्रं चन्द्रमा जीवलोकं, किमिति निजकलङ्कं नात्मसंस्थं प्रमार्ष्टि ।
भवति विदितमेतत्प्रायशः सज्जनानां, परहितनिरतानामादरो नाऽत्मकार्ये ॥१२०॥
सुभाषित रत्नाकर (शार्ङ्गधर)

चन्द्रमाः समग्रम् जीवलोकम् धवलयति। किम् (सः) आत्मसंस्थम् निजकलङ्कम् न प्रमार्ष्टि ? इति ।
प्रायशः परहित-निरतानाम् सज्जनानाम् एतत् विदितम्, आत्मकार्ये आदरः न भवति ॥

The Moon illuminates the whole world but why it is that it does not wipe its dark spot itself ? Probably, for the the noble (righteous) persons who are engaged in the welfare of society, it is known that they should not care for their own work.

चन्द्रमाः - पु. लिं. प्र. वि. ए. व. of चन्द्रमस् , समग्रम् & जीवलोकम् both द्वि. वि. ए. व. of समग्र -adjctv- all, entire & जीवलोक -living world (जीव- adjctv-living, life , लोकः the world- जीवानाम् लोकः - ष. तत्पुरुष स.) ,धवलयति- तृ. पु. ए. व. verb made from धवल् (धवल-adjctv white, pure), आत्मन्- self, oneself, संस्थ- adjctv- existing, staying आत्मनि संस्थम् -आत्मसंस्थम् - स. तत्पुरुष स.-one's own, existing in oneself, निज- adjctv- own, innate, कलङ्कम्- stain, dark spot -निजस्य कलङ्कम् -निजकलङ्कम् - self dark spot किम् -pronominal adjctv- why, इति-अव्यय- so, thus, प्रमार्ष्टि- तृ. पु. ए. व. of प्र+मृज्- २ ग. प.प. to wipe, wash (१० उ.प. मार्जयति-ते), प्रायशस् -अव्यय-generally, probably, mostly, परहितनिरतानाम्- involved in other's welfare, ष. वि. ब. व- पर- the other, हित- well-being (क. भू. धा. वि. of हि-हिनोति to gratify, discharge, despatch), निरत- engaged (क. भू. धा. वि. of नि+रम् -रमते १ ग. आ. प.), परस्य हितम् - परहितम्- ष. तत्पुरुष स.- परहिते निरतः परहितनिरतः -स तत्पुरुष स., सज्जनानाम् - ष. वि. ब. व. of सज्जन - noble person (सत् जनः) एतत्- pronoun- this, विदितम् - known (क. भू. धा. वि. of विद्- वेत्ति or वेद २ ग. प. प.). आत्मकार्ये- own work स. वि. ए. व. of आत्मकार्य (आत्मनः कार्यम् - ष. तत्पुरुष स.), आदरः- respect, care, भवति- तृ. पु. ए. व. of भू १ ग. प. प. -to be, exist

प्रथमवयसि पीतं तोयमल्पं स्मरन्तः, शिरसि निहितभारा नारिकेला नराणाम्
ददति जलमनल्पास्वादमाजीवितान्तं, न हि कृतमुपकारं साधवो विस्मरन्ति ॥१२१॥
- सुभाषितरत्नभाण्डागार

नारिकेलाः , प्रथमवयसि पीतम् अल्पम् तोयम् स्मरन्तः, शिरसि निहित-भाराः, अन्-अल्प-आस्वादम् जलम् आजीवित-अन्तम्, नराणाम् ,ददति। साधवः कृतम्-उपकारम् न हि विस्मरन्ति॥

Remembering the little water consumed as a seedling, (the) coconut (trees), bearing weight on their heads throughout their lives, give sweet water abundantly to humans. The noble never forget any assistance given to them

प्रथमवयसि- स. वि. ए. व. of प्रथमवयस् (प्रथम- adjctv- first, early - वयस् न. लिं. age प्रथमः वयः - वि.पु.प. कर्मधारय स.) पीतम् -drunk, consumed-द्वि. वि. ए. व. of पीत -क.भू. धा. वि. of पा-पिबति १ ग. प. प., अल्पम्- adjctv-small, little, तोयम्- water, स्मरन्तः - प्र. वि. ब. व. of स्मरन् -remembering (वर्त.धा. सा. वि. of स्मृ-स्मरति १ ग. प. प.), शिरसि- स. वि. ए. व. of शिरस्- न. लि.-head. निहित- placed, bearing (क.भू. धा. वि. of नि+हि-हिनोति-५ ग. प.प.), भार-weight, निहितः भारः - निहितभारः- वि.पु.प. कर्मधारय स - bearing weight, नारिकेलाः - प्र. वि. ब. व. of नारिकेल - coconut, नराणाम्- ष. वि. ब. व. of नरः- man, human, अनल्प- not small, plenty, numerous, आस्वादम् & जलम् both द्वि. वि. ए. व. of आस्वाद- taste, delicious & जलम्- water, जीवित- extent alive, living -क.भू. धा. वि. of जीव् १ ग. प. प. to live, अन्तम्- end, जीवितस्य अन्तम् जीवितान्तम्- ष. तत्पुरुष स.-end of life, जीवितान्तस्य पर्यन्तम् इति- आजीवितान्तम् -till the end of life, ददति- तृ. पु. ब.. व. of दा ३ ग. उ. प. ददाति- दत्ते to give, साधवः - प्र. वि. ब. व. of साधु noble person, कृतम्-द्वि. वि. ए. व. of कृत- done क. भू. धा. वि. of कृ. ८ ग. उ. प. करोति-कुरुते- to do, उपकारम् - help, विस्मरन्ति- तृ. पु. ब. व. of वि+स्मृ- to forget
(स्मरति-to remember)

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु, लक्ष्मीः स्थिरा भवतु (समाविशतु) गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा, न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥१२२॥

नीतिनिपुणाः निन्दन्तु यदि वा स्तुवन्तु, लक्ष्मीः स्थिरा भवतु (समाविशतु), वा यथेष्टम् गच्छतु, मरणम् अद्य एव अस्तु वा युगान्तरे वा (अस्तु), धीराः न्याय्यात् पथः पदं न प्रविचलन्ति ॥

Well versed people in law may blame or praise them, wealth may come or go by itself, death may come today or may be in the middle of an era, but men of (moral) strength never deviate their foot from the path of justice.

नीतिनिपुणाः - प्र. वि. ब. व. of नीतिनिपुण- नीतिः -स्त्री. धा.सा.नाम नी-१, उ.प. (नयति, नयते) conduct, policy, law निपुण-expert, clever- नीत्याम् निपुणः -स. तत्पुरुष स., निन्दन्तु -(निन्द्- १ ग. प. प. to blame), स्तुवन्तु (स्तु- २ ग. उ. प. स्तौति-स्तुवीते to praise,extol), भवतु (भू-भवति-१ ग. प. प. to happen), समाविशतु (सम् +आ +विश्- १ ग. प. प.- settle, enter, गच्छतु (गम्-गच्छति १ ग. प. प. to go), अस्तु (अस्-अस्ति २ ग. प. प. to be) all आज्ञार्थ तृ. पु. first two ब. व. rest ए..व., यदि -अव्यय- if, in case, वा -अव्यय- or, also, लक्ष्मीः -स्त्री. लिं. प्र. वि. ए. व. of लक्ष्मी-wealth, स्थिर- adjctv- steady, firm, यथेष्टम् - यथा- like, as, इष्ट- desired-क.भू. धा. वि. of इष्-इच्छति ६ ग. प. प., मरणम्- death, अद्य- adjctv- today, this day, एव- अव्यय- just, quite, only, युगान्तरे -स. वि. ए. व. of युगान्तर- end of an era
युग- era, अन्तर् -अव्यय- between, धीराः -adjctv-brave, prudent, strong, न्याय्यात्-पं. वि. ए. व. of न्याय्य- just, right, proper, पथः - पु. लिं. पं. वि. ए. व. of पथिन्- way, road, पदम्- foot, step, प्रविचलन्ति- तृ. पु. ब. व. of प्र+ वि +चल्- चलति- १ ग. प. प.-waver, move away.

निर्गुणेष्वपि सत्वेषु दयां कुर्वन्ति साधवः |
न हि संहरते ज्योत्स्नां चन्द्रः खलनिकेतनात् (चाण्डालवेश्मनः) ॥ १२३॥ (हितोपदेश)

साधवः निर्गुणेषु सत्वेषु अपि दयाम् कुर्वन्ति।
चन्द्रः ज्योत्स्नाम् खल-निकेतनात् (चाण्डाल-वेश्मनः) न हि संहरते ॥

Noble people take pity even on worthless beings. Moon does not withhold the moonlight from wicked person's house (an outcast's house).

साधवः- प्र. वि. ब. व. of साधुः-पु. लिं. Noble person, a sage, निर्गुणेषु-स. वि. ब. व. of निर्गुण (गुणेन हीनः - तृ. तत्पुरुष स.) -worthless, अपि-अव्यय- also, even, सत्वेषु-स. वि. ब. व. of सत्वम्- being, character, entity, दयाम्- द्वि. वि. ए. व. of दया- pity, compassion, कुर्वन्ति- प. प. तृ. पु. ब. व of कृ-८ ग. उ. प. करोति-कुरुते to do, चन्द्रः- the moon, खलनिकेतनात्- पं. वि. ए. व of खलनिकेतन-a house of wicked man (खलस्य निकेतनः- ष. तत्पुरुष स.), चाण्डालः- an outcast, वेश्मन् -house , dwelling (चाण्डालस्य वेश्मनः - ष. तत्पुरुष स.), ज्योत्स्नाम्- द्वि. वि. ए. व. of ज्योत्स्ना- moonlight, संहरते-आ. प. तृ. पु. ए. व. of हृ -हरति-ते १ ग. उ. प. to take way, rob सम्+हृ= to withdraw, withhold

परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम्
धर्मे स्वीयमनुष्ठानं कस्यचित्तु महात्मनः ॥१२४॥

सर्वेषाम् नृणाम् परोपदेशे पाण्डित्यम् सुकरम् (भवति) ।
स्वीयम् धर्मे अनुष्ठानम् कस्यचित् तु महात्मनः (भवति) ॥

When advising others, it is very easy for all men to show off their knowledge. But, only a select noble person can follow the right path, (Dharma) himself.

सर्वेषाम् & नृणाम् - पु. लिं. ष. वि. ब. व. of सर्व-all, everyone -pronominal adjctv & नृ - a man, person, परोपदेशे- स. वि. ए. व. of परोपदेश- पर other, उपदेश- advice- परेषु उपदेशम् (स. तत्पुरुष स.), पाण्डित्यम् -scholarship, knowledge, सुकरम्- (सु+करम्) -easy to do, स्वीयम् - द्वि. वि. ए. व. of स्वीय- adjctv- own, one's own, धर्मे- स. वि. ए. व. of धर्मः- right path, conduct अनुष्ठानम् -practice, doing, कस्य-ष. वि. ए. व. of किम्-who (अपि, चित्, चन, चिदपि or स्वित् added to किम् gives it an indefinite sense, तु- अव्यय- but, contrary, as to, as for महात्मनः -ष. वि. ए. व. of महात्मन्- great soul, noble person.

तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥१२५॥ -महाभारत,उद्योग. अ.३६. ३४

सताम् गेहे तृणानि, भूमिः, उदकं, सूनृता वाक्, चतुर्थी च एतानि अपि कदाचन न उच्छिद्यन्ते ॥

Grass (for sitting), land (for sleeping), water and fourth being pleasant and honest talk (speech) - these are never cut off from the home of a righteous person (for serving a visitor)

(This has reference to Yudhistir when he was in वनवास)

सताम्- पु. लिं. ष. वि. ब. व. of सत्- noble, righteous person, गेहे- स. वि. ए. व. of गेहम्-house न. लिं., तृणानि- प्र. वि. ब. व. of तृणम्-न. लिं. grass, भूमिः -स्त्री.लिं प्र. वि. ए. व. of भूमि -earth, ground, उदकम् - प्र. वि. ए. व. न. लिं- water, सूनृत- adjctv- true, pleasant (सूनृता-स्त्री. लिं), वाक्- प्र. वि. ए. व. स्त्री. लिं. of वाच् , चतुर्थ- adjctv- fourth चतुर्थी- स्त्री. लिं., एतानि-प्र. वि. ब. व. न. लिं. of एतद्- this, अपि-अव्यय- also, and, कदा- अव्यय- when, added चन gives it indefinite sense- never, उच्छिद्यन्ते -आ. प. तृ. पु. ब. व of उद्+ छिद्- cut off, take away (छिद्- छिनत्ति-छिंत्ते -७ ग. उ. प. to cut, tear, break) कर्मणि प्रयोग

वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ॥ १२६ ॥

लोकोत्तराणाम् वज्रात् अपि कठोराणि, कुसुमात् अपि मृदूनि चेतांसि कः हि विज्ञातुम् अर्हति?

Extraordinary persons' mind (behaviour of great men) are sometimes firm (hard) like the Indra's weapon 'Vajra' (or diamond) and are very gentle like a flower at other times. Who is capable to predict (know) their minds?

लोकः- the world, उत्तरः - upper, higher, excellent, chief, लोकेषु उत्तरः इति - लोकोत्तरः - uncommon, extraordinary- सप्तमि तत्पुरुष स., लोकोत्तराणाम् - ष. वि. ब. व. of लोकोत्तर. वज्रात्, कुसुमात् - both पं. वि. ए. व. of वज्र-diamond or Indra's weapon & कुसुम -flower अपि-अव्यय- also, and कठोराणि & मृदूनि - न. लिं. प्र. वि. ब. व of कठोर- hard & मृदु- soft, tender- both adjctvs, चेतांसि- न. लिं. प्र. वि. ब. व of चेतस्- mind, consciousness, sense, कः -पु. लिं. प्र. वि. ए. व of किम्- who, हि- अव्यय- indeed, surely, विज्ञातुम्- तुमन्त धा. सा. अव्यय of वि+ ज्ञा - to know, understand (ज्ञा- ९ ग. उ. प. जानाति-जानीते- to know, learn), अर्हति- तृ. पु. ए. व. of अर्ह्-१ ग. प. प. to deserve, merit, to be fit.

शैले शैले न माणिक्यं, मौक्तिकं न गजे गजे ।
साधवो न हि सर्वत्र चंदनं न वने वने ॥ १२७ ॥

माणिक्यं शैले शैले न (अस्ति)। मौक्तिकं न गजे गजे (अस्ति)।
साधवः न हि सर्वत्र (सन्ति)। चंदनं वने वने न अस्ति ॥

A precious stone is not found in every mountain. A pearl is not found in every elephant. Noble people are not found everywhere. Sandalwood is not found in every forest. (Greatness cannot be found in all places.)

(It was believed that celestial elephants in rut will develop a pearl in their forehead)

माणिक्यम् - a precious stone, gem, मौक्तिकम्-a pearl. चंदनम्- sandalwood- all in न. लिं. प्र. वि. ए. व., शैले & गजे both पु. लिं. स. वि. ए. व. of शैल- mountain, गज-an elephant, साधवः- पु. लिं प्र. वि. ब. व. of साधु -noble or good person, sage, हि- अव्यय- for instance, indeed, surely, सर्वत्र- अव्यय- everywhere, वने- न. लिं. स. वि. ए. व. of वनम्-forest

सत्संगाद्भवति हि साधुता खलानां, साधूनां नहि खलसंगमात् खलत्वम्।
आमोदं कुसुमभवं मृदेव धत्ते, मृद्गन्धं नहि कुसुमानि धारयन्ति ॥१२८॥

सत्-संगात् खलानाम् हि साधुता भवति। खल-संगमात् साधूनाम् खलत्वम् न हि (आप्नोति)।
कुसुम-भवम् आमोदम् मृद् एव धत्ते । मृद्-गन्धम् नहि कुसुमानि धारयन्ति ॥

By association of righteous persons wicked men indeed acquire gentleness , but righteous persons do not acquire meanness by associating with wicked persons. Fragrance of a flower is acquired by the soil (where it is grown) but the smell of the soil is not acquired by the flowers.

सत्संगात् & खलसंगमात् both पं. वि. ए. व. of सत्संग (सत्- noble person- संगः union, association- सताम् संगः- सत्संगः ष. तत्पुरुष स.) & खलसंगम (संगमः- meeting, union, contact- खलानाम् संगमः-खलसंगमः, खलानाम् - ष. वि. ब. व. of खल- पु.लिं.- wicked man, हि- अव्यय- for instance, surely, indeed, साधुता- nobleness, भवति- तृ. पु. ए. व. of भू- १ ग. प.प. to happen, to be, साधूनाम् - ष. वि. ब. व. of साधुः - a sage, righteous man, खलत्वम्- wickedness, कुसुम- a flower, भव - adjctv- at the end of compound means- arising, produced from, originating in,आमोदम्- द्वि. वि. ए. व. of आमोदः -fragrance, perfume (also means- joy, delight), मृद्- earth, clay, एव- अव्यय- only, just, quite same,धत्ते- तृ. पु. ए. व. of धा-दधाति-धत्ते ३ ग. उ. प. to give, hold, catch, exhibit, मृद्गन्धम्- द्वि. वि. ए. व. of मृद्गन्धः -(मृद् स्त्री. लिं. earth, गन्धः smell, odour, (मृदः गन्धः -मृद्गन्धः ष. तत्पुरुष स.), कुसुमानि- न. लिं. प्र. वि. ब. व. of कसुमम्-flower, धृ- धारयति- ते १० उ.प. धारयन्ति- तृ.पु.ब.व.

संपत्सु महतां चित्तं भवत्युत्पलकोमलम्।
आपत्सु च महाशैलशिलासंघातकर्कशम् ॥१२९॥

महताम् चित्तम् संपत्सु उत्पलकोमलम् भवति ।
आपत्सु च महा-शैल-शिला-संघात-कर्कशम् (भवति) ॥

In prosperity, the mind of great people becomes soft like a lotus. In the times of calamity, it becomes hard like a mass of great mountain solid rock.

महताम्- पु. लिं. ष. वि. ब. व. of महत्- great, noble, चित्तम्- heart, mind, thought, संपत्सु- स.वि. ब. व. of संपद्-स्त्री. लिं- wealth, prosperity, success, उत्पल-lotus, water-lily, कोमल-adjctv- soft (उत्पलम् इव कोमलम्- विशेष्य पु. कर्मधारय स.), भवति- वर्त. तृ. पु. ए. व of भू- भवति- १ ग. प. प. to happen, to be, आपत्सु -स.वि. ब. व. of आपद्- स्त्री. लिं- calamity, failure, distress, महा- great, शैल-mountain, शिला- rock, संघात- assemblage, collection (प्रयोजक क. भू. धा. वि. of सं+हन् -हन्ति २ ग. प. प.), कर्कश- adjctv- hard, rough, (महान् शैलः - महाशैलः - वि.पु.कर्मधारय स.., महाशैलस्य शिला- महाशैलशिला- ष. तत्पुरुष स.- महाशैलशिलाणाम् संघातः- महाशैलशिलासंघातः -ष. तत्पुरुष स., महाशैलशिलासंघातः इव कर्कशः -विशेष्य पु. कर्मधारय स.)-) hard like a mass of great mountain rock.

सुजनो न याति वैरं परहितनिरतो विनाशकालेऽपि।
छेदेऽपि चन्दनतरुः सुरभयति मुखं कुठारस्य ॥ १३०॥– भर्तृहरि

परहितनिरतः सुजनः विनाशकालेऽपि वैरम् न याति। चन्दनतरुः छेदे अपि कुठारस्य मुखम् सुरभयति ॥

A good (noble) person, (who is) always engaged in the welfare of others, will not resort to enmity, even in times of (his own) downfall. The sandalwood tree smears its fragrance onto the blade of the axe, even thogh it cuts it.

पर- the other, हित- good, welfare (क.भू. धा. वि. of हि- हिनोति- ५ ग. प. प. to gratify, promote, cast), निरतः -engaged क. भू. धा. वि. of - नि+रम् (रम्-रमते १ ग. आ. प. to be pleased, delighted), सुजनः- good or noble person (शोभनः जनः- सुजनः -समानाधिकरण प्रादितत्पुरुष स.), विनाशकाले-स. वि. ए. व. of विनाशकालः- time of distress- विनाश- ruin, destruction, कालः - time विनाशकालः - विनाशस्य काल:- ष. तत्पुरुष स), अपि- अव्यय- even, also, वैरम्- enmity, hostility, याति- तृ. पु. ए. व. of या-२ ग. प.प. to become, go, walk, चन्दन- sandalwood, तरुः tree (चन्दनस्य तरुः चन्दनतरुः -ष.तत्पुरुष स.), छेदे स. वि. ए. व. of छेदः - cutting, felling down, कुठारस्य- ष. वि. ए. व. of कुठारः - axe, hatchet मुखम् - face, mouth, सुरभयति- प्रयोजक तृ. पु. ए. व. (सुरभि -adjctv- fragrance, perfume)

संपूर्णकुंभो न करोति शब्दं, अर्धघटो घोषमुपैति नूनम् ।
विद्वान् कुलीनो न करोति गर्वम्, गुणै: विहीना: बहु जल्पयंति ॥१३१॥ (चाणक्य नीति)

संपूर्णकुंभः शब्दम् न करोति । अर्धघटः नूनम् घोषम् उपैति।
विद्वान् कुलीनः गर्वम् न करोति। गुणै: विहीना: बहु जल्पयंति ॥

Fully filled water pitcher doesn't make noise; while half-filled pitcher indeed makes (too much) noise. Learned and well-born people do not display arrogance (of their knowledge); while people with no knowledge, boast a lot!

पूर्ण -full- क. भू. धा वि. of पूर् - ४ ग. आ. प.पूर्यते- to fill, सं+पूर्ण -संपूर्ण- entirely full, कुंभः (pitcher), संपूर्णः कुंभः- संपूर्णकुंभः - वि.पु.कर्मधारय स. शब्दम् - sound, noise, करोति- तृ. पु. ए. व. of कृ- ८ ग. उ. प. to do, अर्धः- (half) घटः (pitcher)- अर्धघटः - वि.पु.कर्मधारय स.., नूनम् -अव्यय-indeed, surely, घोषम् - sound, noise, उपैति- तृ. पु. ए. व. of उप+इ to acquire, have (इ-एति- २ ग. प. प. to go, to come to), विद्वान्- पु. लिं. ए. व. of विद्वस्- adjctv-knowing, learned (विदुषी-स्त्री. लिं., विद्वत्- न. लिं), कुलीनः-adjctv - of good upbringing, well-born, गर्वम् - boasting, गुणै: -न. लिं. तृ. पु. ब. व . of गुणम्- quality, virtue, class, विहीना: -पु. लिं. प्र. वि. ब. व. of विहीन- deprived, devoid of - क. भू. धा. वि. of वि+ हा (हा -जहाति २ ग. प.प. abandon), बहु-अव्यय- lot, जल्पयंति- तृ. पु. ब. व. of जल्प्-१० ग. उ. प. जल्पयति-ते to talk, chatter (also १ ग. प. प. जल्पति)

तारतारतरैरेतैरुत्तरोत्तरतो रुतैः ।
रतार्ता तित्तिरी रौति तीरे तीरे तरौ तरौ ॥१३२॥

एतैः, तारतारतरैः उत्तर-उत्तरतः रुतैः, रत-आर्ता तित्तिरी, तीरे तीरे, तरौ तरौ, रौति ॥

With these high and higher, loud and louder cries, love stricken Tittiri bird is crying on every river bank and every tree.

उत्तर- high, उत्तरतः- higher तार- loud, तारतरैः, रुतैः & एतैः - All तृ. वि. ब. व. of तारतर- louder, रुत- cry –adjctiv- (derived from रुद् -रौति, रोदिति- २ ग. प. प.) & एतद् - this, तीरे - स. वि. ए. व. of तीर- river bank, तरौ- स. वि. ए. व. of - तरु - tree, रत- love-hungry क. भू. धा. वि. of रम्- रमते - १ ग. आ. प. rejoice, please, आर्ता- स्त्री. लिं. प्र. वि. ए. व. of आर्त-adjctv- afflicted with, struck by (रतेण आर्तः - रतार्तः -तृ. तत्पु.स.), तित्तिरी- स्त्री. लिं. प्र. वि. ए. व. a kind of bird.

क्षमाशस्त्रं करे यस्य, दुर्जनः किं करिष्यति ।
अतृणे पतितो वन्हिः, स्वयमेवोपशाम्यति ॥१३३॥ महाभा. पर्व ५, अ ३३

यस्य करे क्षमाशस्त्रं (अस्ति), दुर्जनः (तस्य) किम् करिष्यति ?
अतृणे पतितः वन्हिः स्वयम् एव उपशाम्यति ॥

One who has weapon of forgiveness in his hand, what (harm) will a bad person do to him ?
Fire fallen on a grassless land will extinguish by itself only.

यस्य - whose- पु. लिं. ष. वि. ए. व. of यद् -who, करे - स. वि. ए. व. of करम्- न. लिं or करः -पु. लिं hand, क्षमा - forgiveness, forbearance, शस्त्रम्- weapon- क्षमा एव शस्त्रम् - क्षमाशस्त्रम्- अवधारण पूर्वपद कर्मधारय. दुर्जनः -दुष्टः जनः- प्रादितत्पुरुष स. bad or wicked person, किम्- pronominal adjctv. who, what, which (कः- पु. लिं, का- स्त्री. लिं & किम् न. लिं.), करिष्यति- सामान्य or द्वितीय भविष्य. तृ. पु. ए. व. of कृ- ८ ग. उ. प. to do, अतृणे- स. वि. ए. व. of अतृण- न तृणम् (grass) नञ्तत्पुरुष स.- grassless, पतित-fallen- क. भू. धा. वि. of पत् -पतति १ ग. प. प. to fall, वन्हिः- पु. लिं. प्र. वि. ए. व. fire, स्वयम्-अव्यय- oneself or itself, एव- अव्यय- just, only उपशाम्यति- तृ. पु. ए. व of उप+शम् ४ ग. प. प. cease, stop, extinguish (शम् - शाम्यति to be calm, quiet)

आरोप्यते शिला शैले यत्नेन महता यथा ।
पात्यते तु क्षणेनाधस्तथात्मा गुणदोषयोः ॥१३४॥ पात्यते तु अथवा- निपात्यते

यथा शिला शैले महता यत्नेन आरोप्यते, अधः तु क्षणेन पात्यते, तथा आत्मा गुण-दोषयोः (यत्नेन आरोप्यते, क्षणेन अधः पात्यते) ॥

A boulder gets placed on a hill with great efforts, but is brought down in a second. Likewise, for the soul (Self); great efforts are needed to acquire good qualities but little effort to aquire bad qualities.

यथा-as, like, namely, तथा-so, thus, likewise- both अव्यय, शिला- stone, rock, शैले - स. वि. ए. व. of शैल- hill, mountain, महता, क्षणेन & यत्नेन all तृ. वि. ए. व. of महत्- great, huge, large, क्षण- a moment & यत्न- effort, attempt, आरोप्यते & पात्यते- निपात्यते all- कर्मणि तृ. पु. ए. व. of आ+रुह्- to mount, ascend, (रुह्- रोहति -१ ग. प. प. to grow, rise, increase) & पत्-पतति १ ग. प. प. to fall, come down, नि+पत्- to come down, अधः (अधस्)- अव्यय- down, below, तु-अव्यय- but, on the other hand, as to, आत्मा-पु. लिं. प्र. वि.ए. व. of आत्मन्- soul, self, गुणदोषयोः- ष. वि. द्वि. व. गुणदोष- गुणः च दोषः च - द्वंद्व स. Good and bad, noble and wicked

गुणैः सर्वज्ञतुल्योऽपि सीदत्येको निराश्रयः।
अनर्घ्यमपि माणिक्यं हेमाश्रयमपेक्षते ॥ १३५॥चाणक्यनीति. अ.१६, श्लो १०

एकः निराश्रयः, गुणैः सर्वज्ञतुल्यः अपि, सीदति। अनर्घ्यम् माणिक्यम् अपि हेम-आश्रयम् अपेक्षते।

One who is without shelter perishes. even though he is the most knowledgeable. Invaluable Ruby also seeks protection of the gold.

एकः - one, person, गुणैः- तृ. वि. ब. व.of गुणः- virtue, quality, सर्वज्ञ - सर्वम् जानाति इति- all knowing- उपपद तत्पुरुष स., तुल्य -adjctv- well matched, same, सर्वज्ञेन तुल्यः -तृ. तत्पुरुष स.- Like most knowledgeable, अपि- अव्यय- also, even, आश्रयः, आश्रयम् -place of refuge, dwelling, निर् -अव्यय- without, devoid of, निराश्रयः -(अव्ययी स.) without shelter . सीदति- सद् १ ग. प. प. - to perish, get destroyed, माणिक्यम्- Ruby, अनर्घ्यम् - न अर्घ्यम्- नञ्तत्पुरुष स. priceless, invaluable, हेमन्- न. लिं - gold, आश्रयम् - protection, हेमनः आश्रयम् -हेमाश्रयम्- protection of gold- ष. तत्पुरुष स., अपेक्षते- तृ. पु. ए. व. of अप+ईक्ष् - to require, need (ईक्ष्- ईक्षते १ ग. आ. प. to see, observe)

अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।
तृणैर्गुणत्वमापन्नैः बध्यन्ते मत्तदन्तिनः॥१३६॥

"अल्पानामपि वस्तूनां " अथवा "बहूनामल्पसाराणां"

अल्पानाम् अपि वस्तूनां (बहूनाम् अल्प-साराणाम्) संहतिः, कार्य-साधिका (भवति)।
गुणत्वम् आपन्नैः तृणैः, मत्त-दन्तिनः बध्यन्ते ॥

The unity of even small things (small things in large number) can accomplish (great) works. Straw, when tied in the form of a rope can even tie down mad elephants!

अल्पानाम् & बहूनाम्- both ष. वि. ब. व. of अल्प -small, insignificant & बहु- many, abundant - both adjctvs. अपि- अव्यय-also, even, वस्तूनाम् & अल्पसाराणाम्- both ष. वि. ब. व. of वस्तु-article, matter, thing & अल्पसार- of small value or strength, अल्पम् सारम् इति अल्पसारम्- सम्भावना पूर्व पद कर्मधारय स. (सारम्- essence, substance), संहतिः - union, combination (स्त्री. लिं), कार्यसाधिका-(कार्यम् साधयति इति- उपपद तत्पुरुष स.)- task accomplishing, successful, गुणः- Quality, rope, cord, गुणत्वम् - forming of a rope, आपन्नैः -तृ. वि. ब. व. of आपन्न- acquired, gained क. भू. धा. वि. of आ+पद् (पद्- पद्यते ४ ग. आ. प. - to go, gain, enter), तृणैः -तृ. वि. ब. व. of तृणम् -grass, मत्त- क. भू. धा. वि. of मद्-माद्यति ४ ग. प. प. to be mad, intoxicated, inebriated, दन्तिनः- पु. लिं. प्र. वि. ब. व. of दन्तिन्- an elephant, बध्यन्ते- कर्मणि वर्त. तृ. पु. ब. व. of बंध्- बध्नाति ९ ग. प. प. to bind, tie, capture.

यस्तु शूद्रो दमे सत्ये धर्मे च सततोत्थितः।
तं ब्राह्मणमहं मन्ये वृत्तेन हि भवेद्द्विज. ॥ १३७ ॥ -महाभा. ३.२१९.१५
(So said Kaushik Rishi to Dharmavyadha)

शूद्रः, यः तु दमे सत्ये धर्मे च सतत-उत्थितः, तम् अहम् ब्राह्मणम् मन्ये। वृत्तेन हि (सः) द्विजः भवेत् ॥

I will consider him a Brahmin even though he is a low-born person (शूद्र) if he always practices self control, is truthful and follows prescribed course of conduct (धर्म). (Proper) Conduct alone makes one a Brahmin.

शूद्रः - lowborn, or servile class, यः- पु.लिं प्र. वि. ए. व. of यद् who, तु अव्यय- as, as to, now, दमे, सत्ये, धर्मे, all स. वि. ए. व. of दम-self restraint, curbing the Passions, सत्य- truth, धर्म-prescribed course of conduct & duty. सतत -adjctv. - constantly, always, उत्थित- क. भू. धा. वि. of उद्+स्था- to rise, bound, adhere (स्था-तिष्ठति-१ ग. प. प. to stand, stay), अहम्- प्र. वि. ए. व. of pronoun-अस्मद्- I, We, तम्-him & ब्राह्मणम् -Brahmin पु. लिं. द्वि. वि. ए. व. of तद्- he & ब्राह्मण, मन्ये- प्र. पु. ए. व. of मन्-मन्यते , मनुते ४ & ८ ग. आ. प- to think, believe, conceive, वृत्तेन- तृ. वि. ए. व. of वृत्त- behavior, practice , conduct(क.भू. धा. वि. of वृत्-वर्तते-१ ग. आ. प. to abide, to be, subsist), हि - अव्यय surely, only, द्विजः - द्विः जायते इति द्विजः -उपपद तत्पु. twice born, a Brahmin, Kshatriya or Vaishya भवेत्- विध्यर्थ तृ. पु. ए. व. of भू-भवति १ ग. प. प. to be, to happen.

यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः ।
तथा चतुर्भिः पुरुषः परीक्ष्यते श्रुतेन शीलेन कुलेन कर्मणा ॥१३८॥

यथा कनकम्, निघर्षण-च्छेदन-ताप-ताडनैः (इति) चतुर्भिः परीक्ष्यते, तथा पुरुषः, श्रुतेन शीलेन कुलेन कर्मणा (इति)चतुर्भिः परीक्ष्यते।

The (quality of) gold gets evaluated by four types of tests -scratching (against touch stone), cutting, heating and beating. In the same way, a man gets tested in four ways - education, character, family (up-bring) and his deeds.

यथा-as, like, namely, तथा-so, thus, likewise-both अव्यय, कनकम् -gold, निघर्षणम् (scratching) च ,च्छेदनम् (cutting) च तापम् (heat) च, ताडनम् (beating) च - निघर्षणच्छेदनतापताडनम् -द्वंद्व स.- निघर्षणच्छेदनतापताडनैः- तृ. वि. ब. व., चतुर्भिः- तृ. वि. ब. व., of चतुर्- न. लिं -four, परीक्ष्यते -कर्मणि वर्त. तृ. पु. ए. व. of परि+ईक्ष् to examine, scrutinize (ईक्ष -ईक्षते १ ग. आ. प. to see, observe), पुरुषः- man, male, श्रुतेन शीलेन कुलेन कर्मणा- all तृ. पु. ए. व. of श्रुत- education, learning- क. भू. धा. वि. of श्रु- ५ ग. प.प. to hear, listen, शील- (character), कुल- (family or up-bring), कर्मन्- न. लिं.-work, deed- respectively.

यज्जीव्यते क्षणमपि प्रथितंमनुष्यैः, विज्ञानशौर्यविभवार्यगुणैः समेतम्।
तन्नाम जीवितमिह प्रवदन्ति तज्ज्ञाः , काकोऽपि जीवति चिरं च बलिं च भुङ्क्ते ॥१३९॥ हितोपदेश२.४३
प्रति रूपं - विज्ञानविक्रमयशोभिरभज्यमानम्

मनुष्यैः, विज्ञान-शौर्य-विभव-आर्यगुणैः समेतम् (विज्ञान-विक्रम-यशोभिः अभज्यमानम्) प्रथितम् यद् क्षणम् अपि जीव्यते, तज्ज्ञाः इह तद् जीवितम् प्रवदन्ति नाम । (अन्यथा) काकः अपि, बलिम् च भुङ्क्ते, चिरम् च जीवति ।

Men who live a famous life, even for a moment, endowed with excellent virtues, full of knowledge, valour and wealth (a life inseparable from knowledge, valour and success), that indeed is a real life, as per the experts. (Otherwise,) A crow also eats food and lives long.

मनुष्यैः - तृ. वि.ब. व. of मनुष्यः - man, person, विज्ञानशौर्यविभवार्यगुणैः तृ.वि. ब. व.of विज्ञानशौर्यविभवार्यगुणम्- विज्ञानम् च शौर्यम् च विभवम् च आर्यगुणम् च एतेषाम् समाहारः -द्वंद्व स. -विज्ञान-knowledge, शौर्य-valour, विभव- wealth/riches, आर्य-worthy/ respectable, गुण- quality- आर्यम् गुणम् - आर्यगुणम् - वि.पु.प.कर्मधारय स., समेत-endowed, inclusive of- क. भू. धा. वि. of सं+इ (इ-एति- २ ग. प. प. to go, come) (विज्ञान-विक्रम-यशः success- द्वंद्व स-, अभज्यमान- inseparable - भज्यमान् -वर्त. धा. सा. वि. of भंज्- ७ ग. प. प. भनक्ति to break), प्रथित- famous, celebrated- क. भू. धा. वि. of प्रथ्- प्रथते १ ग. आ. प. to be well-known, famous, यद्- pronoun- which, what क्षणम्-moment, अपि- अव्यय-also, even, जीव्यते- कर्मणि वर्त. तृ. पु. ए. व. of जीव- जीवति १ ग. प. प. to live, तज्ञाः-प्र. वि. ब. व. of तज्ञ- wise, expert, इह- अव्यय-here, तद् - pronoun-it, that, जीवितम् -life, प्रवदन्ति- तृ. पु. ब. व. of प्र +वद्- to regard, consider (वद्-वदति १ ग. प.प. to say, utter), नाम- अव्यय- indeed, truly, (अन्यथा-otherwise), काकः - a crow, चिर - adjctv- long, lasting, बलिम् -द्वि. वि. ए. व. of बलिः- an oblation, daily meal, भुङ्क्ते- तृ. पु. ए. व. of भुज्- ७ ग. उ. प. भुनक्ति- भुङ्क्ते to eat, consume (also means to enjoy, rule, suffer, endure)

दोषमपि गुणवति जने दृष्ट्वा गुणरागिणो न खिद्यन्ते ।
प्रीत्यैव शशिनि पतितं पश्यति लोक कलङ्कमपि ॥१४०॥

गुणरागिणः गुणवति जने दोषम् अपि दृष्ट्वा न खिद्यन्ते।
लोकः शशिनि पतितम् कलङ्कम् अपि प्रीत्या एव पश्यति॥

People, who appreciate virtues, do not feel pain seeing a fault in a virtuous person. People look at the stain on the Moon with delight/ love only.

गुणरागिणः -प्र. वि. ब. व. of गुणरागिन् - गुणः or गुणम्-quality, virtue, रागिन् -adjctv- appreciator, lover, गुणानाम् रागिन्- गुणरागिन्- ष. तत्पुरुष स., गुणवति & जने- both स. वि. ए. व. of गुणवत् - virtuous & जन - person, man, दोषम्- fault, अपि-अव्यय- also, even, दृष्ट्वा- पू. का. वा. त्वान्त. धा. सा. अव्यय of दृश्- पश्यति- १ ग. प. प. to see, look at, खिद्यन्ते- तृ. पु. ब. व. of खिद् -खिद्यते ४ ग. आ. प.(also ७ ग.आ. प. खिंत्ते) to suffer, get pained, लोकः - people, शशिनि- स. वि. ए. व. of शशिन्- the moon, पतितम् and कलङ्कम् द्वि. वि. ए. व. of पतित- क.भू. धा. वि. of पत्-पतति- १ ग. प. प. to fall & कलङ्क- stain, fault, प्रीत्या-स्त्री. लिं. तृ. वि. ए. व. of प्रीतिः delight, love, एव- अव्यय- quite, same, just, exactly

नागुणी गुणिनं वेत्ति गुणी गुणिषु मत्सरी ।
गुणी च गुणरागी च विरलः सरलो जनः ॥१४१॥

अगुणी गुणिनम् न वेत्ति, गुणी गुणिषु मत्सरी (अनुभवति)। सरलः जनः, गुणी च गुणरागी च विरलः (भवति)।

A non virtuous person fails to recognize a virtuous person. A virtuouis person is jealous of (other) virtuous persons. An upright person, who is both virtuous and appreciates virtue (in others), is rare (indeed).

गुणी-पु. लिं. प्र. वि. ए. व. of गुणिन् - endowed with virtues, merits- न गुणिन् -अगुणिन् - नञ्- तत्पुरुष स.-a man without virtue, गुणिनम् - द्वि. वि. ए. व. & गुणिषु- स. वि. ब. व of गुणिन्, वेत्ति- तृ. पु. ए. व. of विद् -२ ग.

प. प. to know, recognize, मत्सरी- -पु. लिं. प्र. वि. ए. व. of मत्सरिन् -jealous, envious सरलः, विरल: & जन: all प्र. वि. ए. व. of सरल- upright, straight, विरल- rare & जन person, गुणरागी- -पु. लिं. प्र. वि. ए. व. of गुणरागिन् - गुणः or गुणम्-quality, virtue, रागिन् -adjctv- appreciator, lover, गुणानाम् रागिन्- गुणरागिन्- ष. तत्पुरुष स.

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः ॥१४२॥

क्रियाम् सहसा न विदधीत। अविवेकः परम् आपदाम् पदम् (भवति)।
गुणलुब्धाः संपदः विमृश्यकारिणम् स्वयम् एव हि वृणुते॥

Work should not be done in a haste. Poor discretion is at the base of major calamities. Quality desiring, wealth/riches will themselves, surely select a discreet person.

क्रियाम् - स्त्री. लिं. द्वि. वि. ए. व. of क्रिया- work, business सहसा- अव्यय- in a haste, rashly, suddenly, विदधीत-विध्यर्थ तृ. पु. ए. व. of वि+धा- to do, perform, cause (धा -३ ग. उ.प. दधाति -धत्ते to put, give, fix, lay, put in, lay on etc), अविवेकः- न विवेकः (judgment, discretion)- नञ्तत्पुरुष स., परम् -adjctv. major, maximum, final, highest, आपदाम् -स्त्री. लिं. ष. वि. ब. व. of आपद्- calamity, danger, misfortune, पदम्- base, cause, foot, गुणलुब्धाः & संपदः - both प्र. वि. ब. व. of गुणलुब्ध- merit-seeking, quality desiring (गुणः - merit, virtue- लुब्ध-desirous, covetous- क. भू. धा.वि. of लुभ्-लुभ्यति ४ ग. प. प. to covet, desire,) & संपद् -स्त्री. लिं wealth, riches, गुणलुब्ध: - गुणानां लुभ्यति इति उपपद तत्पुरुष स ; विमृश्यकारिणम् - द्वि. वि. ए. व. of विमृश्यकारिण् - विमृश्यम् करोति इति- उपपद तत्पुरुष स.-a discreet person- विमृश्य-क. विध्यर्थ धा. सा. वि. of वि+ मृश्- to consider, ponder over, (मृश् -मृशति ६ ग. प.प. to run, consider, deliberate), स्वयम् -अव्यय- of its own, oneself, एव- just, quite, merely & हि surely, indeed- both -अव्यय- वृणुते-५ ग. तृ. पु. ए. व. of वृ- to choose, select (also १ ग उ. प. वरति-ते, ५ ग. उ. प. वृणोति-वृणुते , ९ ग. उ. प. वृणाति-वृणीते)

प्रारभ्यते न खलु विघ्नभयेन नीचैः, प्रारभ्य विघ्नविहिता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः, प्रारभ्य च उत्तमजनाः न परित्यजन्ति ॥१४३॥

नीचैः विघ्नभयेन (कार्यम्) न खलु प्रारभ्यते। मध्याः (कार्यम्) प्रारभ्य विघ्नविहिताः विरमन्ति।
उत्तमजनाः विघ्नैः पुनर् पुनर् अपि प्रतिहन्यमानाः, (कार्यम्) प्रारभ्य च न परित्यजन्ति॥

Low (thinking) people do not start (the work) due to the fear of difficulties. Average people start (the work) but leave it half way, when faced with difficulties. But Good people after starting the work, do not leave it, despite of facing difficulties repeatedly.

नीचैः & विघ्नैः- both तृ. वि. ब. व. of नीच-small, low, dwarfish & विघ्न-difficulty, trouble, विघ्नभयेन- तृ. वि. ए. व. of विघ्नभयम्- विघ्न- obstacle, difficulty, भय- fear - विघ्नस्य भयम्- विघ्नभयम्- ष. तत्पुरुष स., खलु - अव्यय- surely, truly, प्रारभ्यते- कर्मणि प्रयोग. प्र+आ+रभ् (रभ्-रभते १ ग. आ.प. to begin, set), मध्याः & विघ्नविहिताः both प्र. वि. ब. व. of मध्य - middle, average, & विघ्नविहित- विघ्नेन विहितः - तृ. तत्पुरुष स.-

विहित faced, disturbed, approached -क. भू. धा. वि. of वि+हि (हि -हिनोति ५ ग. प. प. to impel, cast, promote), विरमन्ति- तृ. पु. ब. व. of वि+रम्- १.प.प. (to rest, stop (रम्-रमते-१ ग. आ. प. to be delighted, to rejoice), उत्तमजनाः & प्रतिहन्यमानाः -प्र. वि. ब. व. of उत्तमजन- उत्तमः जनः - good people वि.पु.प.कर्मधारय स. & प्रतिहन्यमान - प्रति- अव्यय-prefix to verb means upon,, against, हन्यमान- killed, attached-वर्त. धा. सा. वि. of हन्-हन्ति - २ ग. प. प. to kill, strike, पुनर् -again, once again & अपि-also, even - both अव्यय- परित्यजन्ति- प. प. तृ. पु. ब. व. of परि+त्यज् १ ग. प. प. to leave, quit

मनसि वचसि काये पुण्यपीयूषपूर्णाः, त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः।
परगुणपरमानून्पर्वतीकृत्य नित्यं, निजहृदि विकसन्तः सन्ति सन्तः कियन्तः॥१४४॥

मनसि वचसि काये पुण्य-पीयूष-पूर्णाः, त्रिभुवनम् उपकारश्रेणिभिः प्रीणयन्तः, पर-गुण-परमाणून्-नित्यम् पर्वतीकृत्य निजहृदि विकसन्तः, सन्तः कियन्तः सन्ति?

How many saintly people are there who have full pure nectar in their mind, words and body, who please the three worlds with series of obligations and who always make a mountain out of smallest of others' virtue in their own hearts ?

मनसि -in mind- मनस्, वचसि-in words-वचस्- both न. लिं., काये - in body- कयः or कायम्- all in स. वि. ए. व., पुण्य- pure, holy, पीयूष-nector, पूर्ण- full क. भू. धा. वि. of पूर् -पूर्यते ४ ग. आ.प.- पुण्य: पीयूषः - पुण्यपीयूषः - वि.पु.प.कर्मधारय स., पुण्यपीयूषेण पूर्णः -पुण्यपीयूषपूर्णः - तृ. तत्पुरुष स., त्रिभुवनम् - द्वि. वि.ए. व. of त्रिभुवनम्. त्रयणाम् भुवनानाम् समाहारः- द्विगु स., Three worlds ; उपकारश्रेणिभिः - तृ. वि. ए. व.- उपकारः -service, help, obligation, श्रेणिः- series, line- उपकाराणाम् श्रेणिः - उपकारश्रेणिः -ष. तत्पुरुष स; प्रीणयन्तः- प्र. वि. ब. व. of प्रीणयन्- वर्त. धा. सा. वि. of प्री-प्रीणाति- प्रीणीते ९ ग. उ. प. to delight, please, परगुणपरमाणून् -द्वि. वि. ब. व. of परगुणपरमाणु- पर- other, गुण- virtue, परमाणुः- molecule, परस्य गुणम्- परगुणम् -ष. तत्पुरुष स.- परमाणुः इव परगुणम्- परगुणपरमाणुः - उपमानोत्तरपद कर्मधारय स., नित्य- adjctv- constant, continual, निज- adjctv- one's own, inborn, हृदि- स. वि. ए. व. of हृद्- mind, heart, निजस्य हृदि- निजहृदि- ष. तत्पुरुष स., पर्वतः mountain, hill, कृत्य- पू. का. वा. ल्यबन्त धा सा. अव्यय of कृ-करोति-कुरुते ८ ग. उ. प. to do- न पर्वतः -अपर्वतः -अपर्वतम् पर्वतम् संपद्यमानम् कृत्वा- पर्वतीकृत्य - च्विसमास, विकसन्तः- प्र. वि. ब. व. of विकसन् - वर्त. धा. सा. वि. of वि+ कस्- to expand, nurture (कस्-कसति १ ग. प. प.- to go, approach), सन्तः - प्र. वि. ब. व. of सत् - noble, virtuous,(कियन्तः -प्र. वि. ब. व. of कियन्-adjctv- how many, सन्ति- तृ. पु. ब. व. of अस् -अस्ति-२ ग. प. प. to be

हस्तस्य भूषणं दानं, सत्यं कण्ठस्य भूषणम् ।
श्रोत्रस्य भूषणं शास्त्रं , भूषणैः किं प्रयोजनम् ॥१४५॥

हस्तस्य भूषणं दानम् (अस्ति) । कण्ठस्य भूषणम् सत्यम् (भवति) ।
श्रोत्रस्य भूषणम् शास्त्रम् (अस्ति)। (अतः,अन्यैः) भूषणैः किम् प्रयोजनम् (भवति) ?

Giving is the decoration for the hand, (speaking) truth is the decoration of the throat, listening to knowledge is the decoration for the ear. (So) what (then) is use of (all other) ornaments?

दानम्-giving, charity, gift, भूषणम्- decoration, worthy possession, ornament, सत्यम्- truth, sincerity, शास्त्रम्- knowledge, science, प्रयोजनम्- use, utility -all in प्र. वि. ए. व., हस्तस्य, कण्ठस्य, श्रोत्रस्य all ष. वि. ए. व. of हस्तः -hand, कण्ठः - throat, श्रोत्रम्- ear, (अन्यैः) भूषणैः- तृ. वि. ब. व. of अन्य-other & भूषणम् , किम्- pronoun- what, why

वृत्तं यत्नेन संरक्षेत्वित्तमायाति याति च ।
अक्षीणो वित्ततः क्षीणो, वृत्ततस्तु हतो हतः ॥१४६॥ -महाभा. ३.२१९.१५ विदुर नीतिः

वृत्तम् यत्नेन संरक्षेत् । वित्तम् आयाति याति च।
क्षीणः वित्ततः अक्षीणः (अस्ति)। (किन्तु) वृत्ततस् तु हतः हतः (भवति) ॥

One should guard one's conduct with effort. Wealth comes or goes. If one is poor in wealth, he (may not be) poor (in conduct). But if one is poor in his conduct, he is surely ruined

वृत्तम् - behavior, conduct-क. भू. धा. वि. of वृत्- वर्तते १ ग. आ. प. to exist, abide यत्नेन- तृ. वि. ए. व. of यत्न -effort, exertion, attempt संरक्षेत्- विध्यर्थ तृ. पु.ए. व. of सं+ रक्ष् -१ ग. प. प. to protect, guard, वित्तम्- wealth, आयाति & याति- तृ. पु. ए. व. of आ+या- to come या- to go (२ ग. प. प.), वित्ततः -from wealth & वृत्ततः- from behavior -ततस् or ततः -अव्यय- from that, thence, by, क्षीण- adjctv- lean, diminished, poor- (क. भू. धा. वि. of क्षि- १, ५, & ९ ग. प. प. क्षयति, क्षिणोति & क्षिणाति - to diminish, waste, kill, destroy, decay), न क्षीणः - अक्षीणः नञ्तत्पुरुष स. -not poor or not diminished, तु -अव्यय - but, contrary, हतः - killed, ruined destroyed- क. भू. धा. वि. of हन्- हन्ति २ ग. प. प.

सर्वाः सम्पत्तयः तस्य संतुष्टं यस्य मानसम्।
उपानद्गूढपादस्य ननु चर्मावृतैव भू ॥१४७॥

यस्य मानसम् संतुष्टम् (अस्ति), तस्य एव (भवति) सर्वाः सम्पत्तयः।
उपानद्-गूढपादस्य ननु भू चर्मावृता एव (भवति) ॥

One who is contented in his heart, has all the wealths. For a person whose feet are protected by the footwear, entire world is, as if, it is covered with the skin.

यस्य -whose & तस्य- his, both ष. वि. ए. व. of यद् -what, which & तद्- he, she it, मानसम्- द्वि. वि. ए. व. of मानस: - Mind, heart, संतुष्टम्- द्वि. वि. ए. व.of संतुष्ट- क. भू. धा. वि. of सं+ तुष् - happy, contented (तुष्-तुष्यति- ४ ग. प. प. to be pleased), सर्वाः & सम्पत्तयः - प्र. वि. ब. व. of सर्व- pronominal adjctv- all, entire & सम्पत्तिः -wealth, riches, उपानद्गूढपादस्य- ष. वि. ए. व of उपानद्गूढपादम्; उपानह्- sandal, shoe, गूढ -covered, protected -क. भू. धा. वि. of गुह् -गूहति-ते १ ग उ. प., पादम्- foot, पादम् गूहति इति- गूढपादः- उपपद तत्पुरुष स., उपानदेन गूढपादम् -उपानद्गूढपादम् -ष. तत्पुरुष स., ननु -अव्यय -as if , भू - earth, चर्मावृता-चर्मेण आवृता इति- तृ. तत्पुरुष स., आवृत - क. भू. धा. वि 0f आवृत -आ+वृत(वृत्यते -४ आ.प.) - covered एव-अव्यय- just, quite

यदि सन्ति गुणाः पुंसां विकसन्त्येव ते स्वयं |
न हि कस्तूरिकामोदः शपथेन विभाव्यते ॥ १४८ ॥

पुंसाम् यदि गुणाः सन्ति, ते स्वयम् एव विकसन्ति। कस्तूरिका-मोदः शपथेन न हि विभाव्यते।

If men possesss some (great) qualities, they themselves blossom (and get known to others). The sweet smell of Kastoorika (a perfume derived from the naval of a musk deer), does not require any swearing to shine itself!

पुंसाम् - ष. वि. ब. व. of पुंस्-(पुमान् पुमांसौ पुमांसः) a man, male, यदि-अव्यय- if, in case, गुणाः , ते - प्र. वि. ब. व. of गुण, virtue, quality & तद् he, she, it, सन्ति-तृ. पु. ब. व. of अस्-अस्ति २ ग. प. प. to be, स्वयम् -of one's own & एव - quite, just, merely-both- अव्यय, विकसन्ति- तृ. पु. ब. व. of वि+ कस्- blossom, develop (कस्- कसति १ ग. प. प. to move, approach), कस्तूरिका- musk, मोदः - perfume, fragrance (also means pleasing, delighting)- कस्तूरिकायाः मोदः- ष. तत्पुरुष स., शपथेन- तृ. वि. ए. व. of शपथ-swearing, on oath, न - particle of negation, हि- indeed, surely- both अव्यय, विभाव्यते-gets known- कर्मणि प्रयोग तृ. पु. ए. व. of वि+भा to appear, shine (भा -भाति २ ग. प. प. to seem, show oneself, shine)

हस्ती स्थूलतनुः स चाङ्कुशवशः किं हस्तिमात्रोऽङ्कुशः
वज्रेणाभिहताः पतन्ति गिरयः किं शैलमात्रः पविः।
दीपे प्रज्वलिते विनश्यति तमः किं दीपमात्रं तमः
तेजो यस्य विराजते स बलवान् स्थूलेषु कः प्रत्ययः॥ १४९॥

हस्ती स्थूल-तनुः (भवति)। सः च अङ्कुश-वशः (अस्ति)। अङ्कुशः हस्ति-मात्रः किम् ?
गिरयः वज्रेण अभिहताः पतन्ति । पविः शैल-मात्रः किम् ?
प्रज्वलिते दीपे तमः विनश्यति। तमः दीप-मात्रम् किम् ?
यस्य तेजः विराजते सः बलवान् (भवति)। स्थूलेषु प्रत्ययः कः?

The elephant has a huge body but is controlled by a goad. Is the goad as big as the elephant? Mountains fall when struck by a thunderbolt. Is the thunderbolt as strong as the mountain? When a lamp is lit, darkness goes away. Is the darkness as small as the lamp? One in whom, inner strength prevails, is really strong. Is there any certainty of strength in the bulk?

हस्ती- प्र. वि. ए. व. of हस्तिन्-an elephant, स्थूल - adjctv- bulky, big, तनुः -body- स्थूलः तनुः- स्थूलतनुः वि.पु.प.कर्मधारय स. सः & अङ्कुशवशः- both प्र. वि. ए. व. of तद्- he, she it & अङ्कुशवश (अङ्कुशेन वशः-तृ. तत्पुरुष स.- अङ्कुशः - goad & वशिन्- subdued, under control), मात्र- adjctv- an affix added to nouns in the sense of' measuring as much as', किम्- pronominal adjctv.-what, which who, गिरयः & अभिहताः - both प्र. वि. ब. व. of गिरि -mountain & अभिहत- struck - क. भू. धा. वि. of अभि+ हन् to strike (हन् -हन्ति-२ ग. प. प.- to kill, destroy,) वज्रेण- तृ. वि. ए. व. of -वज्रः,वज्रम्- thunderbolt, पतन्ति- तृ. पु. ब. व of पत्-पतति १ ग. प. प. to fall , पविः- thunderbolt, शैलः- mountain, प्रज्वलिते & दीपे - स. वि. ए. व. of प्रज्वलित- lit, to burn & दीपम् - lamp, तमः- darkness, विनश्यति- तृ. पु. ए. व. of वि+नश् - get destroyed - (नश् –नश्यति ४ ग. प. प.), यस्य- ष. वि. ए. व. of यद्- which, what, तेजः - प्र. वि. ए. व. of तेजस्- brilliance, fire of energy, विराजते- तृ. पु. ए. व. of वि+ राज् to shine (राज्-राजति-ते १ ग. उ. प to shine),

बलवान्- strong-- प्र. वि. ए. व. of बलवत्, स्थूलेषु- स. वि. ब. व. of स्थूल; प्रत्ययः & कः - प्र. वि. ए. व. of प्रत्यय- surety, certainty & किम्- which, what,

वाञ्छा सज्जनसंगमे परगुणे प्रीतिर्गुरौ नम्रता, विद्यायां व्यसनं स्वयोषिति रतिः लोकापवादात्भयम् ।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खलैष्वेते येषु वसन्ति निर्मलगुणाः तेभ्यो नरेभ्यो नमः॥१५०॥

भर्तृहरि-नीति. (नरेभ्यो अथवा महद्भ्यो)

येषु, एते निर्मलगुणाः, सज्जनसंगमे वाञ्छा, परगुणे प्रीतिः, गुरौ नम्रता, विद्यायाम् व्यसनम्, स्व-योषिति रतिः, लोक-अपवादात् भयम्, शूलिनि भक्तिः, आत्मदमने शक्तिः, खलैः संसर्ग-मुक्तिः, वसन्ति, तेभ्यः नरेभ्यः (महद्भ्यः) नमः।

Salutations to those great people, who have noble qualities like, desire for the company of noble people, love for other's good qualities, respect for teachers/elders, interest in acquiring knowledge, making love only to one's own wife, fear of public blame, devotion to the God, strength for self restraint and freedom from the company of wicked people

सज्जनसंगमे, परगुणे, गुरौ, विद्यायाम्, योषिति, शूलिनि, आत्मदमने-all स. वि. ए. व. of सज्जनसंगमः- सज्जनानाम् संगमः ष. तत्पुरुष स.- सत् जनः- सज्जनः noble people, परगुणः -परस्य गुणः- ष. तत्पुरुष स., परः - other- गुण -गुणम्- पु/न. लिं) quality, virtue, गुरुः (पु. लिं) teacher, elder, विद्या (स्त्री. लिं)- knowledge, योषित्-(स्त्री. लिं) -wife, शूलिन्- (पु. लिं) Shiva (armed with spear),God आत्मदमन- self restraint- आत्मन्- self, दमन- restraint, control आत्मनः दमनः ष. तत्पुरुष स., वाञ्छा- desire, wish, प्रीतिः-love, नम्रता- obedience, reverence, व्यसनम्- interest, स्व- one's own, रतिः- love, लोक- people, अपवादात् -पं. वि. ए. व. of अपवाद-blame, censuring, भयम्-fear भक्तिः- devotion, शक्तिः- strength, खलैः -तृ. वि. ब. व. of खलः - wicked person, संसर्ग- company,contact, मुक्तिः -relief, liberation, संसर्गात् मुक्तिः- संसर्गमुक्तिः - पं. तत्पुरुष स., एते & निर्मलगुणाः- both पु. लिं, प्र. वि. ब. व. of एतद् -this-he-she-it & निर्मलगुणः-निर्गतम् मलम्- निर्मलम्- समानाधिकरण प्रादितत्पुरुष स.- pure, निर्मलः गुणः - निर्मलगुणः- वि.पु.कर्मधारय स. , येषु- पु. लिं. स. वि. ब. व. of यद् who, वसन्ति- तृ. पु. ब. व. of वस्- वसति १ ग. प.प. to inhabit, dwell, तेभ्यः & नरेभ्यः (महद्भ्यः) both च. वि. ब. व. of तद् - that, he, she, it, नमः or नमस् -अव्यय- a bow, salutation

Abbreviations and Grammar:

नाम च लिङ्ग च : Nouns & Gender :
पुल्लिंगी - पु. -Masculine - राम, नर, जन, गुरु, पितृ ,हरि, कवि etc.
स्त्रीलिंगी - स्त्री. - Feminine - कन्या, नदी, प्रजा, शाला,धेनु, मातृ etc
नपुन्सकलिङ्गी - न.पु. - Neutral - कमल, जल,मित्र, वारि etc.

वचन : Number:
एक वचन - ए.व. (singular), द्वि वचन- द्वि. व- (Dual) , बहु वचन- ब.व (Plural)

विभक्ति-वि. :Case of Nouns:
Inflection of nouns, a case or case termination , There are eight विभक्तिs
प्रथमा- प्र, -कर्ता Subject, द्वितिया-द्वि, कर्म -Object/Nominative , तृतीया-तृ- करण-instrumental-Via, how ., चतुर्थी-च. संप्रदान-Dative To, For, पंचमी-पं -अपादान Ablative-from, thru, because, , षष्ठी-ष.- संबन्ध - Genitive, Possessive सप्तमी-स. अधिकरण- Locative- In, संबोधन-सं -Vocative- Addressing

धातु - Verbs with some examples
A verb is given with its classification (गण, पद) & Present tense, Third Person singular.
आ. प.=आत्मने पद, प.प.=परस्मै पद, उ.प= उभय पद. गण –ग. (१ to १0)
वर्तमान काल तृतीय पुरुष एक वचन- वर्त. तृ. पु. ए. व.-Present tense Third Person singular

गण	परस्मैपद	आत्मनेपद
१	नी - नयति , पत् -पतति , भू -भवति , वस् -वसति	ईक्ष् -ईक्षते, वन्द् - वन्दते, रुच् - रोचते, रम् - रमते
२	या - याति, अस् - अस्ति	शी-शेते, नु-नौति
३	धा - दधाति, हा - जहाति	धा- धत्ते
४	नश् -नश्यति , पुष् -पुष्यति , मुह् -मुह्यति	जन् - जायते,
५	चि - चिनोति, आप् - आप्नोति	चि -चिनुते
६	इष् - इच्छति, विश्- विशति, मुच् - मुञ्चति	मृ -म्रियते
७	युज्- युनक्ति	युज् - युंक्ते
८	तन् - तनोति, कृ - करोति	तन् - तनुते, कृ - कुरुते
९	क्री - क्रीणाति	क्री- क्रीणीते
१०	कथ् -कथयति	कथ् -कथयते

धातुरुपानि:- Verb Tense :Example : भू-(भव) -१. प. - to be

लट् - वर्तमान काळ -(वर्त. तृ. पु. ए. व.-) भवति

लिट् - भूत काळ- अनद्यतन परोक्ष (अन.प.भूत or भू.) —फार पूर्वी - बभूव - तृ. पु. ए. व

लुट् - भविष्य काळ- अनद्यतन -(अन. भविष्य or भ.का.) फार दूर- भविता- तृ. पु. ए. व

लृट् -भविष्य काळ - सामान्य - (सा. भविष्य or भ.का) - भविष्यति -तृ. पु. ए. व

लोट् - आद्न्यार्थ - (आ) भवतु - तृ. पु. ए. व

लङ्ग् -भूत काळ - अनद्यतन - (अन.भूत or भू.) - अभवत् -. तृ. पु. ए. व

लिङ्ग - विध्यर्थ् - भवेत्- तृ. पु. ए. व

लुन्ग - भूतकाल -अभूत - तृ. पु. ए. व

लुन्ग-हेतु मद्धाव- अभविष्यत् तृ. पु. ए. व

कर्मणि प्रयोग - object <->subject with तृतीया विभक्ति.
धातु+य -> त्यज्-त्यज्यते .. mostly आत्मनेपद

प्रयोजक -Causal form of Verb- - e.g. गम्- to go, गच्छति- goes, गमयति- causes to go
कृ- to do, करोति-does, कारयति-causes to do etc
प्रयोजक धातु उभयपदी सन्ति :

सर्व नाम: (Pronoun): अहं, युष्मद, इदम्,अदस्, etc.
A word used instead of noun.-अस्मद्-I, we, युष्मद्-you etc

सर्वनाम विशेषण : Pronominal Adjective
e. g. एतद्- this, इदम्- this, here etc

विशेषण (वि.)-Adjective - A word describing a noun

अव्यय - Indeclinable- (ind) or (अ)
e.g. अपि- also, and, . एव- just or just so किन्तु - but च --and इति - like this

धातुसाधित नाम - Noun derived from Verb
नीति:, गमनं, गति:
स्वेदन - स्विद्- स्विद्यति ४ ग. प. प. to sweat, perspire

धातुसाधित अव्यय - Indeclinable derived from Verb
तुमन्त-हेत्वर्थक धातुसाधित अव्यय -(तु. हे. धा. अव्यय) -e. g. गम्- गन्तुम्, कृ- कर्तुम् etc
भूत कालवाचक त्वान्त धातुसाधित अव्यय- (भू का.वा. त्वान्त. धा.सा. अव्यय)-e. g. गम्-गत्वा, कृ-कृत्वा etc
पूर्वकालवाचक ल्यबन्त धातुसाधित अव्यय- (पू.का.वा.ल्यबन्त धा.सा.अव्यय)-e. g. आ+गम्- आगत्य, कृ-कृत्य

धातुसाधित विशेषण - Adjectives derived from verbs

कर्तरि वर्तमानकालवाचक धातुसाधित विशेषण (वर्त. धा. सा. वि.) Present Participle - गच्छत, वदत्, यच्छत्
कर्तरि भूतकालवाचाक धातुसाधित विशेषण -(कर्तरि भू.का.धा. वि.) - कृतवत्
कर्मणि भूतकालवाचक धातुसाधित विशेषण -क. भू. धा. वि. Past Passive Participle - e. g. गम्-गत, कृ-कृत , श्रुत
कर्मणि विध्यर्थ धातुसाधित विशेषण -क. वि. धा. वि- Potential Passive Participle- e. g. गम्-गन्तव्य, गमनीय & गम्य, कृ-कर्तव्य, करणीय, कार्य-कृत्य etc
वर्त. धा.सा. वि. सेव्य: - सेव्-सेवते १ ग. आ. प. to serve, attend upon

क्रिया-विशेषण अव्यय -Adverb- -a word describing a verb.
अत:, अत्र, अधुना,अपि,इति,एव,

क्रिया-विशेषण - Adverb-
अतस, इतस् (both mean "from this, than this, hence"), कुतः कालात्, "since what time? ;
अत्र ("here"), तत्र ("there"), यत्र ("where" relative), कुत्र ("where?" interrogative),
तथा ("in that manner, thus"), यथा ("in which manner, just as")
यदा ("when" relative), कदा ("when?" interrogative),

समास -Compounds:

द्वंद्व समास-द्वंद्व स.- उभय पदप्रधान -compounding of two or more words
इतरेतर योग द्वंद्व स - रामः च लक्ष्मणः च -रामलक्षमणौ
समाहार द्वंद्व स. -Grouping of similar objects - पाणिपादमुखं - पाणी च पादौ च मुखं च
(Typically न.पु.ए.व.)

द्विगु समास - First word is numeric (Typically न.पु.ए.व.)
एकवद्भावी -सप्तफली - सप्तानां फलानां समाहार:
अनेकवद्भावी -सप्तर्षय: - सप्त च ते ऋषय च

तत्पुरुष समास- तत्पु. स.-उत्तरपद प्रधान :compounding words having distinct qualities.
प्रथमा तत्पु.. - मध्यान्ह: - मध्य: अन्ह: - see कर्मधारय समास
द्वितीया तत्पु..-ग्रामगत: - ग्रामं गत:
तृतीय तत्पु..- मातृसदृश:- मात्रा सदृश:
चतुर्थी तत्पु. - युपदारु-यूपाय दारु
पञ्चमी तत्पु. - सिंहभयं -सिंहात् भयं
षष्ठी तत्पु.- राजपुरुष:- राद्न्य: पुरुष:
सप्तमि तत्पु.- विद्याप्रवीण: - विद्यां प्रवीण:

नञ् तत्पु. - अविद्वान् - न विद्वान्
उपपद तत्पु.- धनद: - धनं ददाति इति, भूपाल: - भुवं पालयति इति.

कर्मधारय समास (कर्म.) - Both have same प्रथमा विभक्ति
विशेषण पूर्व पद - नीलवस्त्रं - नीलं च तत् वस्त्रं च
विशेष्य पूर्वपद - वीरभीत: - वीर: च असौ भीत: च
विशेषण उभयपद - शीतोष्ण - शीतं च तत् उष्णं च
उपमान पूर्व पद - घनश्याम - घन: इव श्याम:
उपमान उत्तरपद - नरसिंह- नर: सिंह इव

सम्भावना पूर्व पद - गुणबुद्धिः - गुण इति बुद्धिः
अवधारणा पूर्वपद - विद्याधनं - विद्या एव धनं
उपमेय पूर्वपद - मुखचन्द्रः- मुखं एव चन्द्रः
प्रादि - (प्रथम पद - प्र, परा, अप, दूर, सु, वि etc) - प्राचार्यः - प्रगतः आचार्यः